इस शरीर में इन्दुजा अर्थात् चन्द्रनाड़ी इड़ा वामभाग में है। वह गंगा है। सूर्यकन्या पिंगला (यमुना) दक्षिण भाग में है और उन दोनों के बीच मेरुदण्ड में सुषुम्णा (सरस्वती) है। वह प्रायः अदृश्य रहती है। उसका स्थान ही तीर्थराज प्रयाग है ॥ ७८ ॥ शरीरस्थ कैलास पर्वत अर्थात् सहस्रार चक्र आप की कुटी है और सबसे नीचे वाला मूलाधार चक्र शिवा का ओक (निवास) है। इसे कामाख्या देवी का कामपीठ भी कहते हैं। यह स्मर (कामदेव) का और उनकी प्रिया रति का गृह है ॥ ७९ ॥ हे प्रभो! मेरा मन जब आप की प्राप्ति के लिये कामपीठ को पार कर धीरे-धीरे मूलाधार, स्वाधिष्ठान आदि चक्रों का भेदन करता हुआ सुषुम्णा पथ से मेरुदण्ड मार्ग से आपके सुमेरु या कैलास पर्वत पर अर्थात् सहस्रार चक्र में पहुंचता है तब आप कुलिप्सा (नाना प्रकार के कुलोभों) को और काम कामना आदि दोषों को समाप्त कर शरीर में स्थित ग्रहों, द्वीपों, सागरों, तीर्थों, पुरियों, नाड़ियों और परमात्मा आदि का प्रबोध करा देते हैं। हमारे मस्तिष्क में स्थित अगणित ज्ञानगृहों के द्वार खोल देते हैं ॥ ८० ॥ अतः हे कामेश्वर देव! मैं बार बार याचना कर रहा हूं कि आप कृपया मेरे शरीर में स्थित सुरों को जगा दें और स्वयं जाग जायं ताकि मैं असत् कामनाओं और काम को जीत लूं तथा शरीर की सात पुरियों और चक्रों के गुणों को जान लूं ॥ ८१ ॥

सतां मारतृष्णाद्यपस्मारहारिन् अहंकारसंहारकं रावणानाम् ।
जनानां मनोनिर्गदंकारमीडे हृदिस्थं शिवं कारणं कारणानाम् ॥ ८२ ॥
विपद्दारकं नारदं भूसुराणां सदाचारसंस्कारदं पत्पराणाम् ।
निजोद्धारकामो मुहुर्नौमि शंभो हरं त्वां वरेण्याश्रयं कातराणाम् ॥ ८३ ॥
अचिन्त्याद्भुतं निर्गुणं निर्विकारं गुणानामगारं पितस्त्वामुदारम् ।
प्रपन्नोपकाराय नानावतारं दयाब्धिं शिवं नौमि संसारसारम् ॥ ८४ ॥
परीवारकान्तारकान्तारतं मां चमत्कारसत्कारकाराविहारम् ।
मृड त्राहि वित्ताद्यकूपारमग्नं प्रभो साम्प्रतं त्वां श्रितं कर्णधारम् ॥ ८५ ॥
पदख्यातिभोगात्मजार्थेषु मुग्धं शिवं त्वामुपेक्ष्येन्द्रियार्थे जविष्ठम् ।
कृथाः सच्चिदानन्द चेतो मदीयं द्रुतं सात्त्विकं साधुसंकल्पनिष्ठम् ॥ ८६ ॥
तमोज्योतिषा चामृतेनाष्टमृत्यून् गुणैर्दोषसंघं कृषीष्ठा दविष्ठम् ।
खलेभ्योऽतिदूरं नयस्वेति याचे कृपासागरं त्वां शिवं हृत्प्रतिष्ठम् ॥ ८७ ॥

हे हृदयस्थ शिव! आप सज्जनों के काम, तृष्णा आदि रोगों के नाशक हैं, दूसरों को त्रास देने वाले रावणों के अहंकार के संहारक हैं, कारणों के कारण हैं और भक्तों के मन को निर्मल करते हैं ॥ ८२ ॥ हे शंभो! आप इस पृथ्वी पर स्थित देवों (सज्जन विद्वानों) की विपत्तियों के नाशक हैं, नार (आनन्द) के दाता हैं, अपनी शरण में आये निराधारों को सदा सुसंस्कार देते हैं और कातरों के सर्वश्रेष्ठ आश्रय हैं अतः मैं अपने उद्धार की कामना से आप की शरण में आया हूं। आप को मेरा बार बार प्रणाम है ॥ ८३ ॥ हे पिताजी! आप अचिन्त्य, अद्भुत, निर्गुण और निर्विकार होकर भी गुणों के धाम और उदार हैं, दया के सागर हैं, संसार के सार हैं और शरणागत सज्जनों की रक्षा के लिये नाना अवतार लिया करते हैं ॥ ८४ ॥ मैं इस समय परिवार रूपी गहन वन में और कान्ता में रत हूं, चमत्कार और सत्कार की कारा में बन्द हूं, धन आदि की तृष्णा के अकूपार (सागर) में डूब गया हूं अतः अशान्त हूं। इसलिये अब हताश होकर भवसागर के कर्णधार आप की शरण में आया हूं। हे प्रभो! मेरी रक्षा करें, अपने मृड नाम को सत्य करें ॥ ८५ ॥ हे सच्चिदानन्द! इस समय मेरा मन आप को भूल कर उच्चपद, ख्याति, नाना प्रकार के भोगों, पुत्र, पुत्री, धन और इन्द्रियों के अन्य विषयों में मुग्ध है, उन्हीं की ओर दौड़ रहा है अतः आप कृपया उसे शीघ्र सात्त्विक और शुभसंकल्पवान् बना दें ॥ ८६ ॥ ज्योति से तम को, ज्ञानामृत से आठ मृत्युओं को

सधूमाग्निवद् दृश्यते मानसं मे मलैरावृतादर्शवत् साम्प्रतं यत् ।
क्रिया हेऽमलेशाशुतोष स्मरारे भवारे द्रुतं निर्मलं दीप्तिवत् तत् ॥ ८८ ॥
क्वचित् साधुहृत्सूदिताः सन्ति शंभो गुणाब्धेर्गुणैस्ते युताभूरिभंगाः ।
क्वचित् सन्ति विज्ञेषु वीरेषु दृश्या हरे ते गुणानां प्रभूतास्तरंगाः ॥ ८९ ॥
मुहुश्चेतसः शुद्धयेऽहं नमामि स्मरामि प्रतीतांस्तवांशावतारान् ।
शरीरेण वाचा धिया लोकभद्रे रतान् सर्वदा तान्नृदेवानुदारान् ॥ ९० ॥
न मन्येऽहमेषां वपुर्ब्रह्मदेवं परं वेद्मि तद् ब्रह्मणः पूतगेहम् ।
अतो नौमि तन्मन्दिरन्ते तथा त्वां विदेहं स्थितं तत्र भान्तं सदेहम् ॥ ९१ ॥
श्रुतं स्पर्शतो योगिनां पादरेणोः कुपूया भवन्त्यालयाद्याः प्रशस्ताः ।
सतां दर्शनाच्चोपदेशान्नराणां भवन्त्यामया मानसस्था निरस्ताः ॥ ९२ ॥

और गुणों से दोषसंघों को दूर कर दें। मेरे हृदय में स्थित कृपासागर शिव! मुझे पापियों से बहुत दूर रखें। बस, मेरी यही प्रार्थना है ॥ ८७ ॥

हे अमलेश, आशुतोष, कामारि! मेरा मन इस समय धूम से आवृत अग्नि और धूल से ढके दर्पण सा हो गया है। हे भवारे! आप उसे शीघ्र निर्मल और दीप्तियुत बना दें ॥ ८८ ॥

तमसो मा ज्योतिर्गमय । मृत्योरमृतं गमय असतो मा सद्गमय ।
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च (गीता) ॥

हे शंभो! हे हरे! मैंने कहीं कहीं ऐसे साधुओं, विद्वानों और वीरों के दर्शन किये हैं जिनके हृदयों में गुणसागर आप के अनेक गुणों की तरंगें लहरा रही हैं ॥ ८९ ॥ वे उदार नरदेव शरीर से, वाणी से और मन से सदा लोककल्याण में लगे हैं। वे महापुरुष आप के अंशावतार कहे जाते हैं। मैं अपने चित्त की शुद्धि के लिये उनका बार-बार स्मरण करता हूं, उनको श्रद्धा से प्रणाम करता हूं। वे भी हमारे देव हैं ॥ ९० ॥

मैं इनके शरीरों को देव या ब्रह्म नहीं मानता। इन्हें ब्रह्म का पवित्र गृह (क्षेत्र) समझता हूं और यह जानता हूं कि इनमें आप का उदय हो गया है अतः आप के इन मन्दिरों को प्रणाम करता हूं। आप निराकार इनमें साकार प्रतीत हो रहे हैं ॥ ९१ ॥ मैंने सुना हैं कि योगियों के चरणरज के स्पर्श से सदोष भवन आदि पवित्र हो जाते हैं तथा सन्तों के दर्शन से और उपदेश के श्रवण से मन के सारे रोग निरस्त हो जाते हैं ॥ ९२ ॥

अतो नौम्यहं शौचसन्तोषविद्यानिकायान् पवित्राशयान् भूसुरांस्तान् ।
तपस्त्यागविज्ञानमैत्रीतितिक्षादयासत्क्रियासत्यशौर्यैरुपेतान् ॥ ९३ ॥

विज्ञानमय दक्षिणामूर्ति

प्रसन्नाननं दक्षिणामूर्तिमीडे वटाधः स्थितं दक्षिणास्यं युवानम् । नुतं हात-सन्देहवृद्धैर्मुनीशैः सनन्दादिसिद्धेश्वरैः सेव्यमानम् ॥ ९४ ॥
निधानं श्रियो ज्ञानवासो वसानं ददानं मुदं दर्शनात् सावधानम् ।
स्वदेहोत्थगन्धैर्दिशो वासयन्तं भजे मौनिनं ज्ञानभूतिं दधानम् ॥ ९५ ॥
निवातस्थदीपस्यवर्तेः शिखावत् स्थिरं वर्ष्मणा स्थाणुमृज्वंगयष्टिम् ।
नियम्यानिलं नौमि पद्मासनस्थं स्थिरं चेतसा न्यस्तनासाग्रदृष्टिम् ॥ ९६ ॥
समुद्घाट्य नेत्रे सतां कर्मठानां प्रकुर्वन्तमंगेषु पीयूषवृष्टिम् ।
मुहुर्नौमि कुर्वन्तमाराधकानां कुलिप्साविसृष्टिं सदुत्साहसृष्टिम् ॥ ९७ ॥

अतः तपस्या त्याग ज्ञान विज्ञान मित्रता विनय सहिष्णुता दया सदाचार सत्य शौच अर्थशौच सन्तोष के धाम, पवित्रात्मा इन भूसुरों को प्रणाम करता हूं ॥ ९३ ॥

मैं उन विज्ञानेश भगवान् दक्षिणामूर्ति शिव को प्रणाम करता हूं जो वटवृक्ष के नीचे दक्षिणमुख से बैठे हैं, प्रसन्न हैं और युवक हैं। वे युवक हैं और वहां बैठे अनेक वृद्ध मुनीश्वरों एवं सनक सनन्दन आदि सिद्धों से सेवित हैं। वहां सब मौन हैं और भगवान् मौन रह कर ही सबके सन्देहों को समाप्त कर देते हैं। यह वार्तालाप वाणी से नहीं, हृदय से होता है ॥ ९४ ॥.

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः ॥ आदि शंकराचार्य

वे श्री के निधान हैं, सावधान (समाधिस्थ) हैं, मौन हैं, अपने शरीर के सुगन्ध से दसो दिशाओं को सुवासित कर रहे हैं, ज्ञान ही उनका वस्त्र है और ज्ञान ही भूति है, विभूति है। उन्हें प्रणाम है ॥ ९५ ॥ उनका शरीर वायुविहीन स्थान में स्थित दीपशिखा और स्थाणु (सूखे वृक्ष) की भांति निश्चल है, शरीर सीधा है और दृष्टि नासिका के अग्र भाग पर स्थिर है। वे शरीरस्थ वायुओं को नियंत्रित कर पद्मासन में बैठे हैं और उनका चित्त स्थिर है ॥ ९६ ॥ वे समाधि से विरत होने पर नेत्र खोल कर अपने दृष्टिपात से वहां बैठे सज्जनों और सत्कर्मियों के अंगों पर अमृत की वर्षा करते हैं, अपने भक्तों की कुलिप्सा को समाप्त करते हैं और उत्साह बढ़ाते हैं ॥ ९७ ॥

व्रजन्तीक्षितुं पामरा उत्सुका यं समाकर्ण्य तत्स्नेहसिद्ध्योरुदन्तम् ।
भवन्तीक्षणादेव सन्तो रुदन्तः कुवृत्तीस्त्यजन्त्याशु वन्दे हरं तम् ॥ ९८ ॥
पुनर्ज्ञानविज्ञानदाक्षिण्यदेहं विषं किंकराज्ञानरूपं पिबन्तम् ।
शिवं दक्षिणामूर्तिमीडे ददानं प्रबोधामृतं पत्परेभ्यो भवन्तम् ॥ ९९ ॥

आनन्दमयो मृत्युंजयः

बुधा मृत्युमाहुर्भयाज्ञानचिन्तापरीवादतृष्णाकुभाषास्मयादीन् ।
रुचिं मादकद्रव्यहिंसानृतादौ सुतासूनुजायाबहुत्वामयादीन् ॥ १०० ॥
शिवानन्दमूर्ते द्विषं मादकानां भजे पुष्टिसंवर्धनं मुन्मयं त्वाम् ।
विमुक्तिप्रदं बन्धनेभ्यश्चमृत्योः गुणव्रातसद्गन्धिमृत्युंजयं त्वाम् ॥ १०१ ॥

उनकी दयालुता और अद्भुत सिद्धियों का समाचार सुन कर अनेक पापी भी उत्सुकता पूर्वक उनका. दर्शन करने जाते हैं, पश्चात्ताप से रोते हैं और अपनी कुवृत्तियों को तुरत छोड़ देते हैं। मेरा उन शंकर को प्रणाम है ॥ ९८ ॥ मैं पुनः उन दक्षिणामूर्ति को बार-बार प्रणाम कर रहा हूं जो अपने भक्तों के अज्ञान रूपी विष को पीकर प्रबोध रूपी अमृत देते हैं और ज्ञान विज्ञान एवं दक्षता ही जिनका शरीर है। वे निराकार, साकार दोनों है ॥ ९९ ॥

नीतिशास्त्र में आठ और अर्थववेद में सौ मृत्युओं का वर्णन है (मृत्युरष्टविधः स्मृतः। मृत्यूनेकशतं ब्रूमः)। वे हैं नाना प्रकार के काल्पनिक मिथ्या भय, अज्ञान, चिन्ता, लोकापवाद, तृष्णा, कटु भाषा, अहंकार आदि। मदिरा भांग गांजा आदि मादक द्रव्यों में रुचि, हिंसा और मिथ्याभाषण आदि में रुचि, पुत्र पुत्र पत्नी की बहुलता तथा आमय (रोग) आदि ॥ १०० ॥ हे आनन्दमूर्ते मृत्युंजय! आप भक्तों को इन मृत्युओं से दूर कर आनन्द देते हैं, मादक पदार्थों के द्वेषी हैं अतः पुष्टिवर्धन हैं, आनन्दमय हैं, मृत्युके बन्धनों से विमुक्तिप्रद हैं और गुणों के समूह रूपी सुगन्ध के उद्गम हैं। आप को प्रणाम है ॥ १०१ ॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् (यजुर्वेद) ॥

ते गुह्यतत्त्वविषये मतभेदसिन्धौ मग्नांस्तवार्चनपरान् मलिनैः पदार्थैः । दत्त्वा प्रबोधमव मृत्युमुखस्थपुत्रान् कुर्या मिथः सुहृदयान् जगदीश विष्णो ॥ १०२ ॥

सारे जगत् के संरक्षक और सर्वव्यापी विश्वनाथ! आप के पुत्र हम आप के गुह्य तत्वों को न जानने के कारण मतभेद के सागर में डूब रहे हैं, मृत्युओं के मुख में स्थित हैं और आप के काल्पनिक शरीरों की मदिरा, मांस, भांग धतूरा आदि मलिन एवं मादक द्रव्यों से पूजा करते हैं। हम आप को जो जल और भोजन देते हैं उसमें भी शुद्धिका ध्यान नहीं रखते। हमने आप अघोर को घोर बना दिया है। हम यह भी भूल चुके हैं कि पाप कर्मों द्वारा अर्जित धन से आप की पूजा नहीं करनी चाहिये, आप सदाचांर को श्रेष्ठ पूजा मानते हैं, अतः हे प्रभो! कृपया प्रबोध दे कर हम सबों को एक दूसरे का सुमित्र बना दें ॥ १०२ ॥

द्वितीयोध्यायः

सोमनाथः

विधुं तारकाणां पतिं दक्षशप्तं विहायापरा रोहिणीरूपसक्तम् ।
जुगोपेश्वरो यक्ष्मतप्तं स्वभक्तं ततः सोमनाथं वदन्ति द्विजास्तम् ॥ १ ॥
कदाप्यस्ति नो संभवः किन्तु योगो विधोस्तारकाभिः सुदूरं स्थिताभिः ।
जडस्यास्ति चन्द्रस्य शक्यो न ताभिर्विवाहो विवादो व्यवायो जडाभिः ॥ २ ॥
मनोज्ञाः स्त्रियः सन्ति नो तारका नो सुतः क्षीरसिन्धोः पुमानस्ति चन्द्रः ।
न हि व्योम्नि नास्यां धरायां कदाचित् च केनापि दुग्धस्य दृष्टः समुद्रः ॥ ३ ॥
अतो दारुणोग्राः कठोराश्च तीक्ष्णाः सुधांशोः प्रियाः सन्ति तारा न काश्चित् ।
श्रुतिः प्राह तास्तारिकाः सौम्यरूपाः शुभाः सन्ति सर्वा न निन्द्यास्ति काचित् ॥४॥

सुप्रसिद्ध पौराणिकी कथा यह है कि प्रजापति दक्ष ने अपनी तारा रूपी अश्विनी भरणी आदि सत्ताईस सुन्दरी कन्याओं का विवाह चन्द्रमा ग्रह से किया किन्तु वह छब्बीस का परित्याग कर केवल रोहिणी में आसक्त हो गया। तब दक्ष ने उसे यक्ष्मा (क्षय) रोग से ग्रस्त होने का शाप दे दिया। इसी से वह कृष्णपक्ष में घटता रहता है किन्तु बाद में शिव ने अपने उस भक्त की यक्ष्मा से रक्षा की अतः द्विज उनको सोमनाथ कहते हैं ॥ १ ॥ किन्तु सत्य यह है कि आकाश में रोहिणी नक्षत्र चन्द्रमार्ग के निकट है, चन्द्रमा उसके पास से जाता है तथा अन्य नक्षत्र चन्द्रकक्षा से दूर हैं। इस आधार पर कवियों ने यह कल्पना कर डाली कि चन्द्रमा की रोहिणी प्रिया है और शेष नक्षत्रों का उसने परित्याग कर दिया है। वस्तुतः नक्षत्र चन्द्रमा से अरबों योजन दूर हैं अतः उनका योग असंभव है तथा चन्द्रमा और नक्षत्र जड़ हैं इसलिये उनका आपस में विवाह, विवाद और व्यवाय (मैथुन) अशक्य है ॥ २ ॥ तारे न तो सुन्दर स्त्रियां हैं, न चन्द्रमा पुरुष है। चन्द्रमा क्षीर सागर का पुत्र नहीं है क्योंकि पृथ्वी पर या आकाश में आज तक किसी ने कभी दूध का सागर नहीं देखा है ॥ ३ ॥ आज का ज्योतिष अनेक तारों (नक्षत्रों) को तीक्ष्ण, दारुण, उग्र, क्रूर, भीषण, अशुभ कहता है किन्तु नक्षत्र ऐसे नहीं हैं। वेद का कथन है कि तारे देवगृह हैं, पवित्र हैं, तारक हैं, और नक्षत्र हैं। इनका कभी क्षय

सुराचार्यसंज्ञस्य खेटस्य पत्न्यां द्विजेशाद् ग्रहात्तारकायां विजातम् ।
बुधं खेचरं चन्द्रसूनुं नृरूपं द्विजाः क्षत्रियाणां वदन्त्यादितातम् ॥ ५ ॥
परं चास्ति नो क्षत्रतातो जडोऽयं बुधो नानलो नो शशी नो दिनेशः ।
पिता चेतनानां जडानां समेषां स एकोऽस्ति विष्णुर्विधाता महेशः ॥ ६ ॥
श्रुतिः प्राह जाता विराजोऽस्य देहाद् द्विजाः क्षत्रिया वैश्यशूद्रान्त्यजाद्याः ।
खभूद्योखभूद्योस्थजीवाश्च तारा बुधेन्द्वग्निवातोदकाहस्कराद्याः ॥ ७ ॥
मते दर्शनस्येश्वरः स्वेच्छयादौ विदेहोऽसृजद् व्योमताराग्रहादीन् ।
विना साधनं वातवह्न्यम्बुगोत्राः पशून् पक्षिणः सागरान् मानवादीन् ॥ ८ ॥

नहीं होता, जो इसमें पूजा करता है वह अक्षयलोक प्राप्त करता है। ये रोचन हैं, शोभन हैं, इनमें सोमरस प्रतिष्ठित है और कोई भी अशुभ नहीं है ॥ ४ ॥
देवगृहा वै नक्षत्राणि। रोचन्ते रोचना दिवि। यदतरंस्तत् तारकाणां तारकत्वम्। यो ह वा इह यजते अमुं स लोकं नक्षते। तन्नक्षत्राणां नक्षत्रत्वम्। नक्षत्राणामुपस्थे सोम आहितः (तै. ब्रा. १।९।३) ॥

द्विजों का कथन है कि देवों के गुरु बृहस्पति की पत्नी से उनके शिष्य द्विजराज चन्द्रमा ने संभोग किया तो मनुष्य रूपी बुध ग्रह पैदा हुआ। वह क्षत्रियों का आदितात (पूर्वज) है ॥ ५ ॥ क्षत्रियों में तीन भेद हैं। सूर्यवंशी, चन्द्रवंशी और अग्निवंशी परन्तु सूर्य, चन्द्र, अग्नि जड़ हैं और चन्द्रमा का पुत्र कहा जाने वाला बुध ग्रह भी जड़ हैं अतः बुध, अग्नि, शशी और सूर्य क्षत्रियों के पिता नहीं हो सकते। सब जड़ों और चेतनों का पिता वह एक ईश्वर है जिसके विष्णु, ब्रह्मां, शिव आदि अनेक नाम हैं। देवों के गुरु बृहस्पति और द्विजों के राजा चन्द्र यदि कोई मानव हैं तो ये इतने कामी नहीं हो सकते जितने कथाओं में वर्णित हैं ॥ ६ ॥ वेद का कथन है कि पूरा ब्रह्माण्ड जिनका शरीर है उन विराट् परमेश्वर के एक एक अंग से ब्राह्मण क्षत्रिय वैश्य शूद्र अन्त्यज आकाश, पृथ्वी द्युलोक, इन तीनों में रहने वाले सब प्राणी, तारा बुध चन्द्र अग्नि वात जल और अहस्कर (सूर्य) आदि ग्रह उत्पन्न हैं ॥ ७ ॥

दर्शन शास्त्र का कथन है कि विदेह (निराकार) ईश्वर ने सृष्टि के प्रारंभ में अपनी इच्छा से विना साधन के आकाश, तारा, ग्रह, वायु अग्नि जल पृथ्वी पशु पक्षी सागर, मनुष्य आदि को रचा है ॥ ८ ॥

विदेहोऽथवा विश्वदेहः सशक्तिः स्वयंभूर्यथा कथ्यते विश्वनाथः
तथैवोमया संयुतोऽयं नृदेहो महादेव उक्तो बुधैः सोमनाथः ॥ ९ ॥
स सर्वत्रगश्चातिसूक्ष्मोऽपि देवो विलोक्याघवृद्धिं व्यथाः सज्जनानाम् ।
सशक्तिर्मनुष्यादिदेहैर्दयाब्धिः करोत्यार्तरक्षणं क्षयं दुर्जनानाम् ॥ १० ॥
स नाशं करोत्यन्धभक्तेर्हठादेरसूयारणादेः स्वधर्मोपदेशात् ।
नवीनैः स्वशोधैः सुधर्मेण वृद्धिं फलान्नौषधादेश्च शान्तेः समन्तात् ॥ ११ ॥
स दत्त्वा फलं कर्मणां लोहितोदां चकार त्रिवेणीं रणात् स्वे निवासे ।
प्रभूता मृता यादवा मद्यमत्ताश्च तस्येच्छया भालकायां प्रभासे ॥ १२ ॥
निजे मन्दिरे तत्र दृष्ट्वा कुवृत्तीः स कालामुखानां च कापालिकानाम् ।
अपर्णामुमां मंगलां योगिराजं स्मरारिं च मद्यामिषैरर्चकानाम् ॥ १३ ॥

ईश्वर विदेह हैं, उनको शरीर नहीं है पर वेदों ने पूरे विश्व को उनका शरीर कहा है। वे स्वयंभू हैं अर्थात् उनका कोई पिंता नहीं है और वे शक्तियों के स्वामी हैं। जैसे शक्तियों से युत ईश्वर विश्वनाथ कहे जाते हैं वैसे ही उमा देवी से युत सदेंह ईश्वर सोमनाथ हैं ॥ ९ ॥ वे सर्वग और सूक्ष्म होने पर भी पाप की वृद्धि और सज्जनों की व्यथा देख कर अपनी शक्ति के साथ मानवादि रूपों में प्रकट हो कर आर्तों की रक्षा और दुष्टों का क्षय करते हैं ॥ १० ॥ वे अपने कर्मों से और धर्मोपदेश से स्वार्थियों एवं अन्धभक्तों द्वारा धर्म में आई विकृति को समाप्त करते हैं, दुराग्रह का विनाश करते हैं तथा मनुष्यों में व्याप्त असूया (ईर्ष्या) और युद्धप्रवृत्ति का भी निरोध करते हैं। वे धर्म का तर्कसंगत विशुद्ध रूप बताते हैं और उससे तथा अपने नूतन वैज्ञानिक शोधों द्वारा फल, अन्न, औषध, शान्ति आदि की चारों ओर वृद्धि करते हैं ॥ ११ ॥ वे जिन स्थानों में कुछ दिनों तक वास करते हैं उसे अद्‌भुत और शिक्षाप्रद बना देते हैं। अपनी महती शक्ति उमा से युत सोमनाथ ने प्रभासक्षेत्र भालका में मदिरामत्त यादवों का विनाश किया। ईश्वरेच्छा से यादवों ने आपस में युद्ध कर त्रिवेणी के जल को लाल कर दिया। वे अपने कर्मों का फल पा गये ॥ १२ ॥

उन्होंने अपने मन्दिर में अपने को उमाशंकर का भक्त मानने वाले कालामुखों और कापालिकों की यह कुवृत्ति देखी कि वे सोमनाथ को योगिराज और कामरिपु कहते हैं तथा उमा को मंगला और अपर्णा मानते हैं पर दोनों की मद्य, मांस

श्मशानालयप्रेतमित्रस्य शंभोश्चिताभस्मलिप्तस्य चोपासकानाम् ।
नृमुण्डाहिमाल्यस्य नग्नस्य रत्नैः सुरादेवदास्यादिभिः पूजकानाम् ॥ १४ ॥
सरोषश्चकार स्वमूर्त्यर्चकानां वधं बन्धनं शंभुदासब्रुवाणाम् ।
वधूरत्नरत्नादिकोशापहारं गदासीषुभिर्म्लेच्छपाटच्चराणाम् ॥ १५ ॥
तमुग्रं भजे भैरवं चण्डिकायाः प्रियं त्वामनेकास्त्रशस्त्रैर्युतायाः ।
पुनः शंभवं सोमनाथं च वन्दे दयायाः खनेर्वल्लभं त्वामुमायाः ॥ १६ ॥

मल्लिकार्जुनः

हृदा वर्ष्मणा मल्लिकापुष्पकल्पां उमां मल्लिकामागमज्ञा वदन्ति ।
महेशप्रियां सद्‌गुणानां स्रवन्तीमुदारां महेच्छां बुधास्तां स्मरन्ति ॥ १७ ॥
स्वकारुण्यसत्त्वार्जवज्ञानसान्त्वैर्मनोधर्ममार्गे नयन्तीं स्तुवन्ति ।
स्वपुण्यौघतः खं दिशः पूरयन्तीं स्मरन्तः शिवां मानसं स्वं पुनन्ति ॥ १८ ॥

आदि से पूजा करते हैं ॥ १३ ॥ वे वास्तव शिव को और श्मशान, भूत आदि अनेक शब्दों के अर्थ को नहीं जानते अतः कहते हैं कि शिव भूतों के साथ श्मशान में नाचते हैं, शरीर पर जले शरीर की राख पोतते हैं, नरमुण्ड की माला पहनते हैं और विवाह के दिन ससुराल में नंगे जाते हैं। आश्चर्य यह है कि ये ऐसे शिव की रत्न सुवर्ण आदि से पूजा करते हैं और उन्हें सुरा तथा देवदासियां अर्पित करते हैं ॥ १४ ॥ इस स्थिति को देख कर प्रभु को क्रोध आया तो उन्होंने इन कपटी शंभुभक्तों और मूर्तिपूजकों का पापी म्लेच्छों की गदाओं से और तलवार से वध और बन्धन कराया तथा इनके सुवर्णरत्नकोष का एवं दासी समूह का उन्हीं म्लेच्छों द्वारा अपहरण कराया ॥ १५ ॥ मैं अनेक शस्त्रों अस्त्रों से युत भीषण चण्डिका के प्रिय उन उग्र भैरव को प्रणाम करता हूं तथा दया की खान माता उमा के वल्लभ उन सोमनाथ प्रभु की वन्दना करता हूं जो शंभव (कल्याण के बीज) और कर्मफल के दाता हैं ॥ १६ ॥

आगमज्ञों का कथन है कि जगदम्बा उमा हृदय और शरीर, दोनों से मल्लिका (बेला) पुष्प की भांति उज्वल हैं, महेश की प्रिया हैं, सद्‌गुणों की स्त्रवन्ती (महानदी) हैं और उदार हैं। विद्वान् भी उन्हें इन गुणों से युत और महाशया मान कर उनका स्मरण करते हैं ॥ १७ ॥ वे अपने कारुण्य, सत्त्व, नम्रता, ज्ञान, सान्त्व (मधुरवाणी और शान्ति) आदि गुणों से सबके मनों को धर्ममार्ग में ले जाती हैं

हृदा वर्ष्मणा चार्जुनं तेऽर्जुनाख्यं प्रसन्नं सुगन्धिं मृडं चिन्तयन्ति ।
नृणां चेतसां धर्ममार्गे प्रवृत्त्यै सभायां चरित्रं तयोः कीर्तयन्ति ॥ १९ ॥
दयाशौर्यविज्ञानतेजोनिधानं जनेभ्यः प्रबोधं ददानं नमन्ति ।
महार्हाम्बरागारयानादिहीनं शिवं दासमृत्युंजयं पूजयन्ति ॥ २० ॥
तयोरात्मजो देवसेनासहायः शठं तारकं धर्मरक्षणाय हत्वा ।
गतः क्रौंचशैलं विभीतो विवाहात् सखीन् मल्लिकामर्जुनं वेश्म हित्वा ॥ २१ ॥
जगत्क्लेशनाशात्मकल्याणलिप्सुः प्रकृत्या महानिन्द्रियार्थेष्वसक्तः ।
स आप्तुं त्रिलोकस्थदेहस्थशक्तीर्विविक्तेऽभवद् राजयोगप्रसक्तः ॥ २२ ॥
गुहं देवसेनापतिं तं नमामो यतीनां गुरुं शक्तिपाणिं कुमारम् ।
स्थितं भ्रामरीधाम्नि नित्यं स्वतन्वा च बोधेन कुर्वन्तमार्तोपकारम् ॥ २३ ॥

और अपने पुण्यों से आकाश और दिशाओं को पूरित कर देती हैं। बुधगण उनकी स्तुति करते हैं और उनका स्मरण करते हुये मन को पवित्र कर देते हैं ॥ १८ ॥ वे उन अर्जुन नामक शिव का चिन्तन करते हैं जो हृदय और शरीर से अर्जुन (गौर) हैं, प्रसन्न हैं, सुगन्धवान् हैं और मृड हैं। वे जनता के मन को धर्ममार्ग में प्रवृत्त करने के लिये सभा में उन दोनों के चरित्र का कीर्तन करते हैं ॥ १९ ॥ वे उन शिव का नमन और पूजन करते हैं जो दया, शौर्य, विज्ञान और तेज के निधान हैं, फिर भी बहुमूल्य वस्त्र, गृह और वाहन से विहीन हैं। जो भक्तों को प्रबोध देते हैं और उनकी मृत्युओं (व्यथाओं, दोषों) को समाप्त कर देते हैं॥ २०॥ मल्लिका और अर्जुन (उमा शंकर) के पुत्र कार्तिकेय देवों के सेनापति हैं। उन्होंने धर्म की रक्षा के लिये शठ तारक का हनन किया और उसके बाद विवाह से भयभीत होकर मित्रों, माता, पिता एवं गृह का त्याग कर क्रौंच पर्वत पर वास किया ॥ २१ ॥

वे जगत् के सभी क्लेशों के निराकरण के तथा आत्मकल्याण के अभिलाषुक थे, स्वभावतः महान् थे और इन्द्रियों के विषयों में अनासक्त थे। वे तीनों लोकों में और शरीर में स्थित अनेकों शक्तियों की प्राप्ति के लिये राजयोग के अभ्यास में संलग्न थे और उस पर्वत पर एकान्त में रहते थे ॥ २२ ॥

हमारा उन देवसेनापति कुमार गुह को प्रणाम है जो योगीश्वर होते हुये भी हाथ में शक्ति धारण करते हैं, भ्रामरी देवी के धाम में स्थित हैं और अपने योग

स्थिता यत्र पातालगंगास्ति कृष्णा पुनीतोदका पर्वतोपत्यकायाम् ।
सदा सुस्वना भ्रामरी स्तौति सूनुं शिवाभर्गयोः पार्श्वगाधित्यकायाम् ॥ २४ ॥
रसालाम्लिकाचन्दनादिद्रुमाणां फलानां घनं काननं यत्सदेशे ।
उमास्कन्दविष्ण्वीशरामादिभक्ता गतेर्ष्या बुधाः सन्ति यस्मिन् प्रदेशे ॥ २५ ॥
झरैराकरैराश्रयैर्गोपघोषैः सुनिर्घोषरूपैर्विहंगैरुपेते ।
स्थितं दक्षिणे तत्र कैलाससंज्ञे कुमारं मनोज्ञे नगे श्रीनिकेते ॥ २६ ॥
नमाम्यावृतं व्याघ्रसिंहैः कुरंगैः शशैर्वानरैर्नीलकण्ठैर्भुजंगैः ।
स्तुतं तापसैर्भूनिपालैः किरातैः कपोतैः पिकैः सारसैः कीरभृंगैः ॥ २७ ॥

की तथा शरीर की शक्ति से सदा दीनों का उपकार करते हैं ॥ २३ ॥

संसार में कुछ ऐसे खल हैं जिन पर सन्तों की शिक्षा का प्रभाव नहीं पड़ता। वे दण्ड से ही मानते हैं। इसीलिये शिव के एक हाथ में डमरु और दूसरे में त्रिशूल है। विष्णु के हाथ में शंख और कमल के साथ गदा और चक्र भी है। दुर्गा काली के हाथों में कमल शंख आदि के साथ खड्ग गदा आदि भी हैं ॥ जहां पर्वत की उपत्यका (निचले भाग) में पवित्र जल वाली कृष्णा नदी स्थित है तथा अधित्यका (ऊपरी भाग) में सुन्दर स्वर वाली भ्रामरी देवी शिवाशिव के पुत्र स्कन्द की स्तुति कर रही हैं ॥ २४ ॥

जिसके सदेश (पास) में आम, इमली, चन्दन आदि अनेक वृक्षों के घने वृक्ष हैं और जिस प्रदेश में उमा, स्कन्द, विष्णु, शिव, राम आदि के ऐसे विद्वान् भक्त विद्यमान हैं जिनमें ईर्ष्या और मतभेद का सर्वथा अभाव है। उनके हृदयों में इनके प्रति छोटे-बड़े की भावना नहीं है ॥ २५ ॥

वे दक्षिण के जिस कैलास पर्वत में स्थित हैं वह मनोज्ञ (सुन्दर) है, पवित्र है, लक्ष्मी का गृह है और झरनों, खानों, मुनियों के आश्रमों, गोपालों के घोषों से तथा सुन्दर स्वर और रूप से युत विहंगों (पक्षियों) से शोभित है ॥ २६ ॥

मेरा उन सुब्रह्मण्य स्कन्ददेव को और उमाशंकर को प्रणाम है जो वहां बाघों, सिंहों, मृगों, खरगोशों, वानरों नीलकण्ठों और सर्पों से आवृत हैं तथा तपस्वियों, भूमिपालों, किरातों, कपोतों, कोकिलों, सारसों, शुकों और भृंगों से स्तुत हैं। जहां पारस्परिक वैर और उच्च-नीच का भाव समाप्त हो गया है ॥ २७ ॥

चतुर्दिक्ष्वधश्चोर्ध्वमाजौ शराणां च भक्तेषु दृष्ट्वास्य कारुण्यपातम् ।
बुधा ऊचिरे भात्ययं कोपि देवः षडास्यो भजे देवमेकाननं तम् ॥ २८ ॥
शिवाजी नृपं नौमि धर्मे च शौर्ये कुमारोपमं धर्मराष्ट्रेशभक्तम् ।
मुहुर्नौम्यहल्यां च यस्या हृदासीदुदारं सुरागारनिर्माणसक्तम् ॥ २९ ॥

महाकालः

नृणामुज्जयिन्या अवन्त्याश्च शक्तेः पतिं त्वामवन्तं जनं साधुपालम् ।
शिवं क्षिप्रयार्द्रांगमार्द्रेशमीडे महाकालमागस्परेभ्यः करालम् ॥ ३० ॥
प्रबोधार्थिने चन्द्रसेनाय राज्ञे गणास्येन विज्ञानचिन्तामणिन्दम् ।
नृपेभ्योऽस्य गोप्तारमीर्ष्यान्वितेभ्यः शरण्यं भजे शंभुमानन्दकन्दम् ॥ ३१ ॥

आजि (युद्ध) में, चारो दिशाओं में और ऊपर-नीचे उनकी बाणवृष्टि को देखकर तथा भक्तों पर करुणामय दृष्टिपात को देखकर विद्वत्समाज कहने लगा कि ये छ मुखों वाले कोई अद्भुत देव प्रतीत हो रहे हैं। मेरा उन एक मुख वाले कार्तिकेय को प्रणाम है ॥ २८ ॥ मेरा उन भूपाल शिवाजी को नमस्कार है जो धर्म और शौर्य में कुमार के अनुयायी थे तथा धर्म, राष्ट्र एवं शिव के भक्त थे। मैं देवी अहल्या को बार-बार प्रणाम करता हूँ जो अति उदार थीं और जिनका हृदय देवागार के निर्माण में आसक्त था। इन दोनों ने यहां प्रशंसनीय कार्य किये हैं॥ २९॥

हर मनुष्य के देह में उज्जयिनी (उत्थानकारिणी) और अवन्ती (संरक्षिका) शक्तियां रहती हैं। निराकार शिव ही उनके स्वामी हैं और वे ही प्रसन्न होने पर उन्हें जगाते हैं। वेद में शिव आर्द्रा नक्षत्र के स्वामी हैं। शिव की शक्ति आर्द्रा माता दयामयी हैं। उनका हृदय स्नेह से आर्द्र रहता है. पहली वर्षा आर्द्रा में ही होती है। गंगा की भांति क्षिप्रा भी शिव की प्रिया हैं। उज्जयिनी नगरी में शिव अपनी इन शक्तियों के साथ साकार हो गये हैं। उन्होंने दयार्द्र होकर साधुओं का उत्थान और संरक्षण तथा कराल होकर आगस्परों (अपराधियों) का वध किया है। उन्हें प्रणाम है ॥ ३० ॥

साकार शंकर ने ज्ञान के इच्छुक उज्जयिनी के राजा चन्द्रसेन को अपने एक गण के आस्य (मुख) से विज्ञानरुपी चिन्तामणि दी तो उनके इस उत्कर्ष से अन्य नृप जलने और उन्हें सताने लगे किन्तु शरणागतवत्सल आनन्दकन्द शिव ने राजा की रक्षा की। उन्हें नमस्कार है ॥ ३१ ॥

शिशुः श्रीकराभीर आविद्धचेता नृपस्येशभक्त्या प्रतीत्यैकतानः ।
हृदा कर्मणानर्च विस्मृत्य निद्रां जलं भोजनं सर्वगं सावधानः ॥ ३२ ॥
स विश्वस्तया चैकसन्तानवत्या सुतानिष्टशंकार्तया नैकवारम् ।
जनन्या निषेधे कृते दूरगोऽर्चत् शिवं चेतसा गद्गदः साश्रुधारम् ॥ ३३ ॥
ततो मानसे शान्तिसत्त्वाधिकत्वात् शिवस्योदयादासुरीवृत्तिहीनः ।
स लेभे शुभाशीः प्रजानां यतीनां स्मरारेः कृपां योगसत्कर्मलीनः ॥ ३४ ॥
भजे पूर्वजं नन्दगोपस्य शंभोः स्वसत्कर्मभिः पूजकं श्रीकरं तम् ।
महाकालमीडे शठैरर्दितानां सतां रक्षकं देहवन्तं भवन्तम् ॥ ३५ ॥

ओंकारनाथः अमलेश्वरः

स्थिता नर्मदा यत्र मान्धातृपुर्यां प्रभो सेवते ध्वानपं नर्मदं त्वाम् ।
तमोंकारनाथामलेशं सदेहं शिवं निर्मलं नौमि विन्ध्याद्रिगं त्वाम् ॥ ३६ ॥

श्रीकर नामक एक अहीर शिशु का हृदय राजा की उस भक्ति और सफलता से आविद्ध हो गया। वह अति प्रतीति के कारण एकतान (एकाग्रचित्त) होकर, अन्न जल निद्रा को प्रायः भूल कर सावधानी से अपने हृदय और कर्म द्वारा सर्वव्यापी ईश्वर का पूजन करने लगा ॥ ३२ ॥ उसकी माता विश्वस्ता (विधवा), एक सन्तान वाली और पुत्र के अनिष्ट की आशंका से आर्त (खिन्न) थी अतः उसने अनेक बार इस कर्म का निषेध किया। इस स्थिति को देख श्रीकर घर से बहुत दूर जाकर क्रियायोग (धारणा, ध्यान, समाधि) में विलीन हो गया। वह गद्गद होकर अश्रुधारा बहाते हुये मन से प्रभु का ध्यान पूजन करने लगा ॥ ३३ ॥

इस कारण उसके मन में शान्ति और सत्त्व का अधिकत्व हो जाने से शिव का उदय हो गया और आसुरी वृत्तियां समाप्त हो गईं। उसके बाद योग और सत्कर्मयोग में लीन होकर उसने प्रजा और सन्तों का शुभाशीर्वाद और शिव का अनुग्रह प्राप्त किया ॥ ३४ ॥ नन्द गोप के अष्टम पूर्वज उस श्रीकर देव को मेरा प्रणाम है जो अपने सत् कर्मों द्वारा जगन्नाथ की पूजा करता था। मेरा उन महाकाल विश्वेश्वर को प्रणाम है जो दूषण आदि शठों से पीड़ित सन्तों की रक्षा के लिये सदेह हो जाया करते हैं ॥ ३५ ॥ हे प्रभो ! मान्धाता की पुरी में नर्मदा (कल्याणदात्री) नदी आप के चरणों में स्थित है, आप की सेवा कर रही है। सारे ध्वान (शब्द) ओम् (अ म) के भीतर स्थित हैं और आप ही आकाश तथा शब्द

वैद्यनाथ

गतौ पुष्कसीकर्कटौ पीडनार्थं महर्षेरगस्त्यस्य शिष्यं सुतीक्ष्णम् ।
उभावुद्धतौ शंभुरोषेण दग्धौ तमाप्तं यतिं पीडयन्तावभीक्ष्णम् ॥ ३७ ॥

विराधं च जामातरं राघवोऽहन् सुता कर्कटी कुंभकर्णेन नीता ।
प्रजा तस्य पुत्रस्य भीमस्य राज्ये मखं धर्मकृत्यानि तत्याज भीता ॥ ३८ ॥

नृपं वन्दिनं कामरूपस्य कृत्वा स चक्रे तदर्च्येश्वरेऽस्त्रप्रहारम् ।
ततो हुंकृतेनैव दग्ध्वा खलं तं दयालुः शिवोऽपाकरोद् भूमिभारम् ॥ ३९ ॥

तमीडेऽर्चितं मूर्तिचित्रेषु भक्तैर्विदेहं प्रभुं देहगं विश्वनाथम् ।
चरन्तं परल्यां सुराष्ट्रे च बंगे चितादौ क्षितावम्बरे वैद्यनाथम् ॥ ४० ॥

के स्वामी हैं। आप प्राणमय पशुपति हैं और ओंकारनाथ हैं। आप विश्वनाथ हैं पर अमल आत्मा वाले आप को विशेष प्रिय हैं। विन्ध्य पर्वत पर स्थित विदेह और सदेह आप ओंकारनाथ और अमलेश्वर को प्रणाम है ॥ ३६ ॥

पुष्कसी और कर्कट महर्षि अगस्त्य के शिष्य सुतीक्ष्ण को कष्ट देने की इच्छा से उनके आश्रम पर गये और उन दोनों उद्धतों ने उन आप्त यति को अभीक्ष्ण (बहुत) पीड़ित किया। तब भगवान् शंकर ने उन्हें अपनी रोषाग्नि से भस्म कर दिया ॥ ३७ ॥

उनके जामाता विराध का श्रीराम ने वध कर दिया और उनकी पुत्री कर्कटी को कुंभकर्ण ले गया। उन दोनों के पुत्र भीम के राज्य में भयभीत प्रजा ने यज्ञ और अन्य धर्मकृत्य बन्द कर दिये ॥ ३८ ॥

भीम ने कामरूप के राजा को बन्दी बना कर उनकी पूज्य मूर्ति पर अस्त्रप्रहार किया तो दयालु शिव ने उसे हुंकार मात्र से भस्म कर भूमि का भार उतारदिया ॥ ३९ ॥

भक्त गण उन विदेह और बहुदेह विश्वनाथ की मूर्तियों और चित्रादिकों के माध्यम से उनकी पूजा करते हैं। वेदों ने उन्हें भिषग्वर (वैद्यनाथ) कहा है। वे धर्म की रक्षा और शान्ति की स्थापना के लिये सदेह होकर परली, सौराष्ट्र, बंग, पृथ्वी, आकाश, चिताभूमि आदि में घूमते रहते हैं। उन्हें प्रणाम है ॥ ४० ॥

भीमशंकरः

भजे भीम भीमातटे सह्यशैले समं जित्वराडाकिनीभिर्भ्रमन्तम् ।
गणैर्जित्वरैरन्वितं पातुमार्यान् मुनींस्तापसान् जाल्महिंस्रांस्तुदन्तम् ॥ ४१ ॥

रामेश्वरः

य आसीत्सहोवान् विजेता नृपाणां सुराणां यमेन्द्राग्निवातादिकानाम् ।
कविर्ज्यौतिषज्ञः श्रुतेर्भाष्यकारो महापण्डितो मन्त्रतन्त्रागमानाम् ॥ ४२ ॥
पटुः सर्ववेदांगशास्त्रोपवेदे गुरुर्नृत्यवादित्रगीतश्रुतीनाम् ।
महान् याजको वैद्यराजोऽप्यभिज्ञः शरीरस्थितप्राणचक्रादिकानाम् ॥ ४३ ॥
पितासीन्मुनिर्विश्रवा यस्य साधुर्नमस्यो महीपालसाधुद्विजानाम् ।
महर्षिः पुलस्त्यश्च तातस्य तातो गुणानां निधिः पूज्यपादः सुराणाम् ॥ ४४ ॥
मुनीनां स संत्रासदोऽपूजयत्त्वां भिषग्राजमुन्मादिधत्तूरकाद्यैः ।
मखे चाखुभिर्लोममांसैः पशूनामसृक्त्वक्शिरान्त्रैर्वसामस्तकाद्यैः ॥ ४५ ॥

आर्यों, मुनियों और तापसों के संरक्षणार्थ तथा धूर्तों और हिंसकों को त्रास देने के लिये भीम (भीषण) रूप धारी शंकर सह्याद्रि के निकट भीमा नदी के तट पर विजेत्री डाकिनियों (देवियों) और विजेता गणों के साथ भ्रमण करते हैं। उन्हें प्रणाम है ॥ ४१ ॥

जो रावण सहोवान् (बली) था, अनेकों नृपों और यम, इन्द्र, अग्नि, वायु आदि सुरों का विजेता था, कवि ज्योतिर्वित् और वेदों का भाष्यकार था, मन्त्र तन्त्र आगम का महापण्डित था ॥ ४२ ॥ सब वेदांगों, शास्त्रों और उपवेदों में पटु था, नृत्य वाद्य और गीत की श्रुतियों का गुरु था, महान् याजक वैद्यराज और शरीर में स्थित वायुओं एवं चक्रादिकों का ज्ञाता था ॥ ४३ ॥ जिसके पिता विश्रवा मुनि साधु ही नहीं, साधुओं, भूपों और द्विजों के पूज्य गुरु थे, जिसके पितामह पुलस्त्य महर्षि गुणों के निधान और देवों के पूज्य थे ॥ ४४ ॥ वह ब्राह्मण मुनियों को त्रास देता था और मोहवश आप वैद्यनाथ का उन्मादक पदार्थों भांग धतूर मदिरा आदि से पूजन करता था। वह यज्ञ में आप को आखु (चूहा) खिलाता था और अन्य देवों को अनेक पशुओं के रोम, मांस, रक्त, त्वचा, नाडी, अंतड़ी, मज्जा, मस्तक आदि अर्पित करता था। वह वेदमंत्रों का भाव नहीं जानता था ॥ ४५ ॥

स्वभक्तस्य किन्त्वेष पौत्रश्च पुत्रः स्वयं ते मखार्चास्तवादौ प्रसक्तः ।
हतो भ्रातृमित्रात्मजाद्यैः समेतो महेश त्वया रक्षितो न स्वभक्तः ॥ ४६ ॥
सुभार्यः सहोमानपि ब्रह्मचारी सुकर्मैव पूजां मखं मन्यमानः ।
गुणानां निधित्वादभूद्रामचन्द्रः सतां चासतां ते प्रियाणां प्रधानः ॥ ४७ ॥
अजानामतो जागरूकोऽस्ति यस्मिन् मनुष्ये तवांशः स एव प्रियस्ते ।
नरे तामसेऽस्तंगतो यत्र तेंऽशः स पूजापरोऽप्यस्ति नो संमतस्ते ॥ ४८ ॥
ससीतं ततो नौमि रामं तथा त्वां स्थितं सेतुबन्धे तटे त्र्यर्णवानाम् ।
प्रदानाय शान्तेर्वनेष्वब्धितीरे भ्रमन्तं गुहासूच्चशृंगेष्वगानाम् ॥ ४९ ॥
धनुष्कोटिगो रामवातायनस्थो विलोक्याम्बरे भानि सिंधूनजानाम् ।
गुणाब्धौ नरेऽप्यस्ति नो पूर्ण ईशो न कर्तृत्वमस्मिन् खतारार्णवानाम् ॥ ५० ॥

किन्तु हे महेश! आप ने अपने भक्त के पौत्र, भक्त के पुत्र और अपने अर्चन स्तोत्रपाठ यज्ञ आदि में रत अपने भक्त की रक्षा नहीं की। भाई पुत्र मित्र आदि के साथ उसे मार डाला ॥ ४६ ॥ दूसरी ओर श्रीराम साधुओं के, असाधुओं के और आपके सर्वश्रेष्ठ प्रिय हो गये। कारण यह था कि वे बलवान् और एक सुन्दरी नारी के पति होने पर भी बहुत दिनों तक ब्रह्मचर्य से रहे। वे गुणों के निधान थे और सत्कर्म को ही पूजा और यज्ञ मानते थे ॥ ४७ ॥ अतः मैं जान गया कि आप को वही मानवं प्रिय है जिसमें आप जाग रहे हैं, जो सात्त्विक है। जो मनुष्य तामस है, जिसमें आप का अंश सो गया है वह यजन पूजन में तत्पर रहने पर भी आप को अप्रिय लगता है ॥ ४८ ॥ अतः मैं सीताराम को प्रणाम करता हूं क्योंकि उनके हृदयों में स्थित ईश्वर पूर्णोदित हैं, जागरूक हैं तथा आप के उस रामेश्वर रूप को नमस्कार करता हूं जो सेतुबन्ध में तीन समुद्रों के संगम में स्थित है तथा संसार को शान्ति देने के लिये वनों में, समुद्रतटों पर और पर्वतों की गुफाओं में, उनके शृंगों पर घूम रहा है ॥ ४९ ॥

हे प्रभो! मैं यहां धनुष्कोटि और रामझरोखे पर बैठ कर जब तीनों सागरों और आकाश के तारों आदि को देखता हूं तो मनन के बाद इस परिणाम पर पहुंचता हूं कि कोई मानव गुणों का सागर होने पर भी ईश्वर का पूर्णावतार नहीं हो सकता क्योंकि उसमें ख (आकाश) के तारों, ग्रहों और सागरों के निर्माण की शक्ति नहीं है अतः वह अंशावतार ही है ॥ ५० ॥

नागेश्वरः

प्रजाः पीडिता दारुकादम्पतीभ्यां गता और्वमौर्वप्रभं तेन शप्तौ ।
गृहीत्वा कुलं विद्रुतावब्धिकूलं शिवं पूजयित्वाप्यभूतां प्रतप्तौ ॥ ५१ ॥

अथो तत्र लोकप्रियं सुप्रियं तौ विशं निर्धनं चक्रतुः सद्विचारम् ।
निशम्य स्थितिं तस्य तत्राशु यातं दयाब्धिं शिवं नौमि भक्तावितारम् ॥ ५२ ॥

सदुग्धानदीदण्डकारण्यभूमौ गदातीर्थगोकर्णरामाचलानाम् ।
समीपे चरं नौमि नागेश्वर त्वां गुहास्थं तुलस्याः प्रियं तापसानाम् ॥ ५३ ॥

विश्वनाथः

गुरुं भूपतीनां सतीनां गतेहं विभूतिव्रजेशं दरीकुंजगेहम् ।
यतिभ्यः प्रबोधप्रकाशप्रदं त्वां नमाम्यन्नपूर्णेश काशीपतेऽहम् ॥ ५४ ॥

दारुकदम्पति रावण की ही भांति शिवभक्त होकर भी धन के लिये प्रजा का शोषण करते थे। उनसे पीड़ित जनता अपना कष्ट सुनाने और्व (अग्नि) के समान तेजस्वी और्व मुनि के पास गई तो उन्होंने दारुक को शाप दिया। दारुक उनसे भयभीत हो कर पूरे परिवार के साथ समुद्र के किनारे भाग गया। वह शिव का पूजक होने पर भी सन्तप्त था ॥ ५१ ॥

अपने स्वभाव से बाध्य होकर उन्होंने वहां भी पवित्र विचार वाले लोकप्रिय सुप्रिय नामक वैश्य को निर्धन कर दिया। उसकी इस स्थिति को जानकर दयासागर और भक्तों के तारक शिव ने वहां पहुंच कर उसकी रक्षा की ॥ ५२ ॥

दुग्धा नदी से शोभित दण्डकारण्य में गदातीर्थ, गोकर्ण, रामाचल आदि के पास भ्रमण करने वाले, गुहा में स्थित, तापसों और तुलसी के प्रिय उन नागेश्वर शिव को प्रणाम है ॥ ५३ ॥

धर्म की रक्षा के लिये ईश्वर ने विभिन्न स्थानों में अवतार लिये हैं। काशीनाथ शिव भूपों और यतियों के गुरु तथा अनेक विभूतियों के स्वामी होकर भी दरीकुंजवासी और गतेह (निष्काम) हैं। वे अन्नपूर्णा शक्ति के स्वामी हैं और यतियों (यत्न करने वालों) को प्रबोध रूपी प्रकाश देते हैं। यह काशयुक्त स्थिति ही काशी है ॥ ५४ ॥

स्मरामीश काशीं पुरीं वल्लभां ते कदापि त्वया कोविदैर्नो वियुक्ताम् ।
गुणात्मत्रिशूलाग्रगां ते गुणग्रयैर्गणैर्वारुणासीसखीभ्यां च युक्ताम् ॥ ५५ ॥

मठैराश्रमैरुच्चसोपानसौधैर्युता मन्दिरैरालिकाश्यन्तिकंगा ।
बहुप्राज्ञभक्तान्विता पुष्टिदा त्वां पुनीतोदका सेवते यत्र गंगा ॥ ५६ ॥

परानन्ददाः कर्णयोः सन्ति यस्यां श्रुतेर्भूरिशाखान्विता वेदशालाः ।
मनोनेत्रयोस्तृप्तिदाः सन्ति सन्तो बुधा भस्मरोचिष्णुबाह्वंसभालाः ॥ ५७ ॥

क्वचित् सन्ति शाक्ताश्च शक्त्यर्थविज्ञाः श्रियं भारतीं मंगलां चिन्तयन्तः ।
दयातुष्टिपुष्टिक्षमाशान्तिलक्ष्मीतितिक्षादिविष्वीशशक्तीः स्मरन्तः ॥ ५८ ॥

हे शिव! आप की प्रिया उस काशी को प्रणाम है जो कभी भी आप से और विद्वानों से विहीन नहीं होती, जो तीनों गुणों के योग रुपी त्रिशूल के अग्रभाग में स्थित है तथा गुणों के निधान गणों से और वरुणा एवं असी नाम्नी सखियों से युत है ॥ ५५ ॥ जहां पवित्र जल वाली, पुष्टिप्रदा, उच्च सोपानों (सीढ़ियों) वाली, अनेक मठों, आश्रमों, भव्य भवनों, मन्दिरों और गुणागार भक्तों से युता तथा अपनी सखी काशी के पास स्थिता गंगा आप की सेवा में रत है ॥ ५६ ॥ जहां कानों को परमानन्द देने वाली वेदों की अनेक शाखाओं से युत वेदशालायें हैं, मन और नेत्र को तृप्ति देने वाले सन्त हैं तथा भस्म से सुशोभित बाहु, स्कन्ध और भाल वाले विद्वान् हैं ॥ ५७ ॥

जहां के शाक्त शक्ति शब्द के अर्थ को जानते हैं। उनका कथन है कि विष्णु (सर्वव्यापी परमात्मा) में लक्ष्मी सरस्वती उमा दया तुष्टि पुष्टि क्षमा शान्ति लक्ष्मी तितिक्षा कान्ति श्रद्धा मैत्री लज्जा उन्नति मेधा बुद्धि आदि अनेक शक्तियां विद्यमान हैं। वे उनकी पत्नी और प्रियायें भी कही जाती हैं। वे हम मनुष्यों के शरीर में भी स्थित हैं। हमें चिन्तन और स्मरण करते हुये उन्हें जगाना चाहिये। उन सुषुप्त शक्तियों को गुरु की बताई विधियों से योगाभ्यास द्वारा प्राप्त करना चाहिये। वे प्रार्थना से नहीं अपितु अभ्यास से मिलती हैं। काशी के इन शाक्तों का शैवों और वैष्णवों से विरोध नहीं अपितु मतैक्य है क्योंकि ये शक्तियां ईश्वर विष्णु की ही हैं ॥ ५८ ॥

क्वचिद् वैष्णवाः सन्ति विश्वेशभक्ताः पुनीतं सुरत्र्यायुषं कामयन्तः।
समश्रद्धया त्र्यम्बकं मृत्युजैत्रं विधिं रामकृष्णौ च बुद्धं स्मरन्तः॥ ५९ ॥
क्वचिद् वेदवेदांगविज्ञानविज्ञा महापण्डिता देवकल्पा विरागाः।
तपोमूर्तयस्त्यक्तदेहार्थचिन्ता जगन्मंगले मंगलायां सरागाः॥ ६० ॥
परित्यज्य गेहे रतिं बन्धहेतुं क्वचित् सन्ति संन्यासिनो भाग्यवन्तः।
जपन्तोऽत्र पंचाक्षरं मन्त्रराजं सशक्तिं शिवं सर्वगं संस्मरन्तः॥ ६१ ॥
शिवांशः शिवोहं वदन्तो मलानां निरासाय वेदान्तवाक्ये रमन्तः।
भ्रमन्तो ममाहं परित्यज्य धन्याः स्वकृत्यैर्वचोभिः शिवं स्मारयन्तः॥ ६२ ॥

शाक्तों की ही भांति यहां के वैष्णव भी विश्वनाथ और जगन्नाथ को एक मानते हैं। उनके हृदयों में मृत्युंजय, त्र्यम्बक, विधाता, रामकृष्ण और बुद्ध में भेदभाव नहीं है। वे ईश्वर से सदा यह प्रार्थना करते रहते हैं कि हमारी बाल्य, युवा और वृद्ध, तीनों अवस्थायें जमदग्नि, कश्यप, देवों और तीर्थंकरों की भांति बीतें॥ ५९ ॥

यहां वेदों वेदांगों के साथ विज्ञान के विज्ञ ऐसे महापण्डित विद्यमान हैं जो विषयों से विरक्त हैं, उन्होंने शरीर और धन की चिन्ता छोड़ दी है किन्तु उन्हें संसार के मंगल में और माता सर्वमंगला (पार्वती) में अनुराग है, वे देवतुल्य हैं और तप की मूर्ति हैं॥ ६० ॥

यहां ऐसे अनेक भाग्यशाली संन्यासियों का निवास है जो गृहस्थाश्रम से विरक्त हैं, उसे बन्धन का हेतु मानते हैं और शक्तियुत शिव का स्मरण करते हुये पांच अक्षरों वाले मन्त्रराज का जप करते हैं॥ ६१ ॥

ये धन्य पुरुष कहते हैं कि मैं शिव हूं, शिव का अंश हूं पर दुर्भाग्य से अपनी महत्ता को भूल गया हूं। ये मेरे तेरे की भावना का परित्याग कर मन में स्थित मलों की समाप्ति के लिये वेदान्त वाक्यों का मनन करते हैं, संसार में सुख-शान्ति की स्थापना के लिये घूमते रहते हैं और वचनों से ही नहीं कर्म से शिव का स्मरण कराते हैं॥ ६२ ॥

कौपीनवन्तः खलु भाग्यवन्तः (श्रीशंकराचार्य)

नमस्तेऽस्तु नारायणायेति वाचं समाकर्ण्य नारायणेति ब्रुवन्तः ।
प्रयच्छन्ति नाशीरमी सर्वनॄणां स्थितं हृत्सु नारायणं भावयन्तः ॥ ६३ ॥

अमीषां मतेऽस्त्यत्र नो कोऽपि मर्त्यो जनेर्वा प्रकृत्या जघन्यः कनिष्ठः ।
हृदीशोदयादल्पधीरप्ययोग्यो भवत्याशु धीमान् महेच्छो वरिष्ठः ॥ ६४ ॥

परित्यज्य मिथ्याग्रहान् भेदभावानमी मन्वते विष्णुमेव स्मरेशम् ।
शिवं सर्वगं ब्रह्म नारायणं वा प्रजानां पतिं वासुदेवं भवेशम् ॥ ६५ ॥

विलोक्यार्जवं धर्मनिष्ठां तथैषां दयासत्क्रियाशौचमैत्रीतितिक्षाः ।
निशम्याद्भुता योगसिद्धीश्च शक्तीर्विचित्रानुभूतीर्हिता उच्चशिक्षाः ॥ ६६ ॥

नरास्तार्किका अन्धभक्तेर्विरुद्धाः प्रयोगस्य दृश्यानुभूत्योश्च भक्ताः ।
परित्यज्य शंका जुगुप्सा अभूवन्नमीषां नियोज्याः प्रशंसाप्रसक्ताः ॥ ६७ ॥

इन महात्माओं का कथन है कि हर मनुष्य के हृदय में नारायण का वास है अतः ये 'नमो नारायणाय' कह कर नमस्कार करने पर आशीर्वाद नहीं देते, केवल नारायण नारायण कहते हैं ॥ ६३ ॥ इनके मत में कोई भी मनुष्य जन्म से या स्वभाव से पापी या छोटा नहीं होता। छोटा वह है जिसके हृदय में स्थित नारायण सुषुप्त हैं। गुरुकृपा से उनके जाग जाने पर मन्दबुद्धि और अयोग्य मनुष्य भी कुछ ही समय में मेधावी, महाशय और बड़ा हो जाता है ॥ ६४ ॥

ये सम्प्रदायगत मिथ्या दुराग्रह और भेदभाव का परित्याग कर विष्णु को ही मदनेश, सर्वव्यापी शिव, परब्रह्म, नारायण, प्रजापति (ब्रह्मा), वासुदेव और भवेश (विश्वनाथ) मानते हैं। ये नारायण और शिव नामों का एक साथ श्रद्धापूर्वक उच्चारण करते हैं ॥ ६५ ॥ इनकी नम्रता, धर्मनिष्ठा, दया, सदाचार, शौच, मैत्री, तितिक्षा, अद्भुत योगसिद्धियों, आश्चर्य जनक अनुभूतियों और हितावह उच्च शिक्षाओं को देखकर और सुनकर ॥ ६६ ॥ शंका और निन्दा का सर्वथा परित्याग कर ऐसे मनुष्य भी इनके दास और अति प्रशंसक हो गये हैं जो पहले घोर तार्किक थे, अन्धश्रद्धा के विरोधी थे और प्रयोगात्मक ज्ञान, प्रत्यक्ष एवं अनुभूति के ही भक्त थे। किसी भी सिद्धान्त को इसलिये नहीं मानते थे कि वह पुरानी पोथियों में लिखा है ॥ ६७ ॥

इमे योगिनः कुर्वते निर्मलैः स्वैर्मनोभिर्मरुन्मण्डलं निर्विकारम् ।
नृणां हृत्सु सम्प्रेषयन् स्वं पवित्रं विचारं च कुर्वन्ति लोकोपकारम् ॥ ६८ ॥
सतां सिद्धिदाः अत्र योगीशपुर्यां क्वचित् सन्ति सूक्ष्मांगसिद्धा भ्रमन्तः ।
क्वचिन्नीतिविज्ञाश्च शान्तेः समृद्धेरुपायान् सदा चिन्तयन्तो दिशन्तः ॥ ६९ ॥
क्वचिच्छंखघंटामृदंगादिनादैः क्वचिद् वेणुवीणास्वरैश्चित्तमोषैः ।
हरन्त्यामयानीशमर्चन्त्यभिज्ञाः सुगीतैर्द्विनृत्यस्तवैः सामघोषैः ॥ ७० ॥
हरन्त्यत्र हृद्देहरोगान् सुवैद्या विनैवौषधं प्राकृतैः सूपचारैः ।
तथा साधवः स्नेहतः शक्तिपाताच्छुभाशीर्भिरक्ष्णोंशुपातैरुदारैः ॥ ७१ ॥
पृथग्वेषभूषा नरा भिन्नभाषाः परित्यक्तभेदाः कनिष्ठा महिष्ठाः ।
दविष्ठा अपि स्निग्धभावा भवानीं शिवं माधवं पूजयन्त्येकनिष्ठाः ॥ ७२ ॥

ये योगी अपने पवित्र मनों द्वारा वायुमण्डल और आकाश को निर्मल बनाते हैं और जनता के हृदयों में अपने पवित्र विचारों को पहुंचा कर समाज का उपकार करते हैं ॥ ६८ ॥ योगियों की इस पवित्र प्रकाशी पुरी में सन्तों और योगियों को सिद्धियां प्रदान करने वाले ऐसे अनेक सिद्ध पुरुष घूमते हैं जिनके शरीर सूक्ष्म हैं तथा नीति और राजनीति के ऐसे अनेक विशेषज्ञ महात्मा हैं जो सर्वदा समाज की शान्ति और समृद्धि के उपायों का चिन्तन और निदेशन किया करते हैं ॥ ६९ ॥ यहां कहीं मनोहारी शंख घंटा मृदंग आदि के नाद है और कहीं वंशी वीणा के सुस्वर सुनाई देते हैं। संगीतशास्त्र के मर्मज्ञ आचार्य इनसे, विभिन्न रागों में गाये गीतों से, ताण्डव और लास्य नामक दो प्रकार के नृत्यों से, स्तोत्रों से और साममन्त्रों के सुघोषों से ईश्वर का अर्चन करते हैं तथा इनके द्वारा मनुष्यों के शारीरिक एवं मानसिक आमयों (रोगों) को हर लेते हैं ॥ ७० ॥

यहां के आयुर्वेदाचार्य औषधों का प्रयोग किये विना केवल प्राकृतिक सदुपचारों से मनुष्यों के मानस और शारीरिक रोगों को समाप्त कर देते हैं और साधु एवं योगी अपने स्नेह से, उदार शक्तिपात से, नेत्रों की किरणों के निपात से तथा शुभाशीर्वाद से वही कर्म करते हैं ॥ ७१ ॥ यहां पूरे भारत के हर जाति के भक्त गण छोटे, बड़े तथा वेष, प्रान्त और भाषा के भेदभाव को भूल कर गंगास्नान और देवदर्शन के लिये आते हैं। वे दूरस्थ होने पर भी स्नेहार्द्र हो कर एक निष्ठा से अन्नपूर्णा, शिव, माधव, दुर्गा, हनुमान् कालभैरव, दण्डपाणि आदि की पूजा करते हैं ॥ ७२ ॥

ददत्यत्र पौरस्त्यपाश्चात्यविद्या बुधा विश्वविद्यालयेषूभयज्ञाः ।
क्वचित् शल्यविज्ञाश्च यच्छन्ति वैद्यास्तनौ मानसे स्वास्थ्यशान्ती च विज्ञाः ॥७३॥
क्वचिच्चित्रकौशेयपीताम्बराणां वणिज्या क्वचिद् हेमरत्नादिका नाम् ।
क्वचिन्मूर्तिपात्रापणः क्वापि वीथी प्रभूतान् सुरानर्चितुं मालिकानाम् ॥ ७४ ॥
निशम्यास्य तीर्थस्य शान्तिं प्रभावं धराया
अनेकः समूहो बुधानाम् । समायाति शान्तिप्रबोधो–
पलब्ध्यै स्वयं दर्शनायात्र भूभेः सुराणाम् ॥ ७५ ॥

बुद्धदेवः

ऋषीणां शिवे पत्तनेऽत्र प्रकाश्यां स्थितं सारनाथे शिवस्यावतारम् ।
वयोवृद्धविद्यातपोवृद्धवन्द्यं युवानं मुनिं नौमि धर्मावितारम् ॥ ७६ ॥
प्रभुं दक्षिणामूर्तिवत् काननेस्मिन् वटाधोऽपि बोधिद्रुमाधो वसन्तम् ।
भजे मूर्तिगं स्वेन मौनेन शिक्षां ददानं जिनं बुद्धदेवं भवन्तम् ॥ ७७ ॥

यहां के विश्वविद्यालयों में पूर्व और पश्चिम दोनों की विद्यायें पढ़ाई जाती हैं। उनमें दोनों के विद्वान् विद्यमान हैं। औषधालयों में कहीं शल्यवेत्ता वैद्य हैं और कहीं मानस रोगों के अभिज्ञ हैं। वे शरीर और मन को शान्ति देते हैं ॥ ७३ ॥ यहां कहीं चित्र विचित्र रेशमी वस्त्रों के, पीताम्बरों के, सोना और रत्नों के आभूषणों के, चित्र विचित्र मूर्तियों के, पात्रों के आपण हैं तो कहीं-कहीं अनेक देवों के पूजन के लिये मालियों की सामग्री की वीथी है ॥ ७४ ॥

इस तीर्थ की शान्ति और प्रभाव का गुणानुवाद सुन कर विश्व के विद्वानों के अनेक समूह शान्ति और प्रबोध की प्राप्ति के लिये तथा इन भूसुरों का स्वयं दर्शन करने के लिये आते रहते हैं ॥ ७५ ॥

ऋषियों के इस शिवपत्तन (मांगलिकस्थान) प्रकाशी के सारनाथ में विराजमान, वयोवृद्ध विद्यावृद्ध तपोवृद्ध महान् पुरुषों से वन्दित, धर्म के संरक्षक, भगवान् शंकर के अवतार युवक मुनि श्रीगौतम बुद्ध को मेरा प्रणाम है ॥ ७६ ॥ श्रीशंकराचार्य ने शिवावतार, श्रीदक्षिणामूर्ति के विषय में लिखा है कि वटवृक्ष के नीचे मौनी युवक गुरु बैठे हैं और उनके चारों ओर नीचे वृद्ध योगीश्वर शिष्य विराजमान हैं। आश्चर्य है, मौन ही गुरु का व्याख्यान है और शिष्यों के संशय समाप्त हो गये हैं।

मृगाणां दवेऽस्मिन् क्वचित् सन्ति वीथ्यः पलाशाम्रयज्ञांगबोधिद्रुमाणाम् ।
वटक्षीरिणीश्रीफलाशोकजम्बूशमीपर्कटीनिम्बधात्र्यादिकानाम् ॥ ७८ ॥
क्वचित् केतकीरात्रिगन्धोत्पलानां च कस्तूरिकामालतीचन्दनानाम् ।
क्वचिन् मल्लिकादेवदारुद्रुमाणां सुगन्धोऽस्ति नानासुमानां फलानाम् ॥ ७९ ॥
क्वचित् सन्ति खेलारताः कृष्णसाराः कुरंगाः शशाः पिंगकृष्णप्लवंगाः ।
क्वचिद् हृद्यरावा मनोज्ञा मयूराः कपोताः शुकाः कोकिलाद्या विहंगाः ॥ ८० ॥
क्वचित् पर्णशालासु देवोपमानां निवासोऽस्ति संन्यासिनां भिक्षुकाणाम् ।
क्वचिन् मन्दिरे मूर्तयः सन्ति शंभोर्महावीरबुद्धर्षभादेः सुराणाम् ॥ ८१ ॥
वनस्यास्य सन्दर्शनाच्चात्र वासात् अपिक्रूरकम्रोद्धतानां खलानाम् ।
भवन्ति प्रशस्तानि चेतांसि नूनं प्रभावान्नभोभूमरुत्तापसानाम् ॥ ८२ ॥

चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः ॥

यहां भी वही स्थिति है। इस कानन में दक्षिणामूर्ति की ही भांति प्रभु कभी वटवृक्ष के नीचे तथा कहीं बोधिद्रुम (पीपल) की छाया में एक मूर्ति में बैठे हैं। उनके चरित्र को जानने वाले भक्तों को उस युवा मौनी मूर्ति से ही शिक्षायें प्राप्त हो जाती हैं, हृदय सात्त्विक हो जाता है। उन जिन बुद्धदेव को प्रणाम है ॥ ७७ ॥ इस मृगदाव में कहीं पलाश, आम, यज्ञांग (गूलर), पीपल आदि की पक्तियां हैं तो कहीं वट, खिरनी, बेल, अशोक, जामुन, शमी, पकड़ी, नीम, आंवला आदि की ॥ ७८ ॥ कही केवड़ा, रातरानी, कमल, कस्तूरी, मालती (चमेली) और चन्दन का तो कही मल्लिका (छोटा बेला) देवदारु, नाना प्रकार के पुष्पों फलों आदि का सुगन्ध है ॥ ७९ ॥ कहीं कृष्णमृग, मृग, खरगोश, काले भूरे वानर आपस में खेल रहे हैं तो कहीं सुन्दर मयूर, कपोत, शुक, कोकिल आदि पक्षियों के मनोहारी राव (कूज़न) हैं ॥ ८० ॥

कहीं पर्णशालाओं में देवतुल्य संन्यासियों और भिक्षुओं का निवास है तो कहीं मन्दिरों में शंभु, महावीर, बुद्ध, ऋषभदेव आदि देवों की मूर्तियां मानस को शुद्ध और सात्त्विक बना रही हैं ॥ ८१ ॥ इस वन के दर्शन से और इसमें निवास से क्रूर, कामी एवं उद्घत खलों के चित्त भी नूनं (निश्चित रूप से) प्रशस्त हो जाते हैं। यह यहां के नभ, भूमि, वायुमण्डल और तपस्वियों का प्रभाव है ॥ ८२ ॥

भजे सर्वतोभद्र शौद्धोदने त्वामघान्ताय मायागृहे जायमानम् ।
प्रतीत्यं समुत्पादमार्यं च सत्यं त्रिरत्नं श्रुतेः पंचशीलं ददानम् ॥ ८३ ॥

विकासाय सत्त्वस्य सर्वार्थसिद्ध्यै प्रबोधाय सत्यस्य सर्वार्थसिद्धम् ।
धरामागतं मारजिद्धर्मराजं शिवं श्रीघनं गौतमं नौमि बुद्धम् ॥ ८४ ॥

जयेऽर्थापहारे नराणां पशूनां वधे तत्परेभ्यो मखेभ्योऽवितारम् ।
जिनार्हन् भजे ज्ञानयज्ञप्रियं त्वां मुनिं शाक्यसिंहं प्रबोधावतारम् ॥ ८५ ॥

जगत् में व्याप्त अघों का अन्त करने के लिये भाग्यशाली महाराज शुद्धोदन के पुत्र के रूप में माता माया के गृह में जायमान सर्वतोभद्र (सबका भला करने वाले) बुद्धदेव! आप को मेरा प्रणाम है। आप ने प्रतीत्यसमुत्पाद, आर्य सत्य, त्रिरत्न और श्रुतिसंमत पंचशील का उपदेश दे कर हमारा उद्धार किया है॥ ८३॥

बौद्धधर्म के त्रिरत्न हैं—मैं बुद्ध (बोधप्राप्त महात्मा) की, धर्म (अभ्युदय कारक मार्ग) की और सन्तसंघ की शरण में जाता हूं। श्रौत (वैदिक) पंचशील ही बुद्ध का पंचशील है। महर्षि पतंजलि ने अपने योगशास्त्र में अहिंसा, सत्य, अचौर्य, ब्रह्मचर्य और अपरिग्रह को पंचशील (यम) कहा है। अचौर्य और अपरिग्रह में थोड़ा-सा अन्तर है अतः बुद्धदेव ने दोनों को एक मान कर सुरा आदि मादक द्रव्यों के परित्याग को पांचवां शील कहा है ॥ ८३ ॥

१ बुद्धं सरणं गच्छामि, २ धम्मं सरणं गच्छामि, ३ संघं सरणं गच्छामि ॥

१ पाणातिपाता वेरमणी सिक्खापदं समादियामि, २ अदिन्नादाना वेरमणी सिक्खापदं समादियामि, ३ कामेसु मिथ्याचारा वेरमणी सिक्खापदं समादियामि, ४ मुसावादा, ५ सुरा मेरयमज्जपमादट्ठाना वेरमणी सिक्खापदं समादियामि ॥

सत्त्व के विकास, सत्य के प्रबोध और सबकी कार्यसिद्धि के लिये सर्वार्थसिद्ध, मारजित् (कामेश्वर) धर्मराज, श्रीघन नामों वाले गौतम बुद्ध के रूप में जो शिव धरा पर अवत्तीर्ण हैं उन्हें मेरा प्रणाम है ॥ ८४ ॥

जो मख (यज्ञ) दिग्विजयों द्वारा धनापहरण में और हवन द्वारा मनुष्यों एवं पशुओं के वध में तत्पर थे उनसे जिन्होंने हमारी रक्षा की उन ज्ञानयज्ञ के प्रेमी, प्रबोध के साक्षात् अवतार जिन, अर्हन् महावीर मुनि को तथा शाक्यसिंह बुद्धदेव को प्रणाम है ॥ ८५ ॥

प्रभुर्मन्दिरे योऽस्ति पद्मासनस्थः प्रकाशप्रदो योगिनां चक्रवर्ती ।
नियम्यानिलं न्यस्तनासाग्रदृष्टिः सबुद्धः प्रबुद्धोस्तु मच्चित्तवर्ती ॥ ८६ ॥

त्र्यम्बकेश्वरः

अहल्यान्वितं गौतमं ब्रह्मशैले कुशावर्ततीर्थे विलोक्येष्टिलीनम् ।
भजे त्र्यम्बकं तत्र गोदोद्गमस्थं सहापर्णया भक्तिभाजामधीनम् ॥ ८७ ॥

केदारनाथः

हिमस्यालयो वित्तराड्दिश्युदीच्यां शिरो भारतस्यास्ति शंभोर्नगेशः ।
वसत्यत्र साकं गणैर्हैमवत्या सुरैस्तापसैर्देवदेवो महेशः ॥ ८८ ॥
नगो भात्ययं शंभुवन्नीलकण्ठः सनीरैर्घनैः सान्द्रसालैस्तमालैः ।
दिनेशांशुभिः सन्ध्ययोः क्वापि शोणः क्वचित् सप्रसूनैः पलाशै रसालैः ॥ ८९ ॥

ज्ञानरुपी प्रकाश के दाता और योगियों के चक्रवर्ती जो बुद्धदेव हमारे हृदय में हैं, यहां मन्दिर में पद्मासन में बैठे हैं, जिन्होंने प्राण, अपान आदि सब वायुओं को जीत लिया है, जिनकी दृष्टि नासाग्र पर स्थिर है वे हमारे हृदय में जाग जायें, यही प्रार्थना है ॥ ८६ ॥

महर्षि गौतम अपनी धर्मपत्नी अहल्या देवी के साथ ब्रह्मशैल के पास कुशावर्त तीर्थ में एक ऐसी इष्टि (यज्ञ) में लीन थे जिसका उद्देश्य लौकिक ईतियों (अतिवृष्टि, अनावृष्टि आदि) को दूर करना था। भक्तों के वशवर्ती भगवान् शंकर माता पार्वती के साथ उनकी सहायता के लिये वहां पहुंच गये। महानदी गोदावरी के उद्गम स्थान में स्थित वे शंकर त्र्यम्बकेश्वर कहे जाते हैं। उन्हें प्रणाम है ॥ ८७ ॥ वित्तराज (कुबेर) की दिशा उत्तर में स्थित नगराज हिमालय भारतमाता का शिर है। देवदेव शंकर ने मानव रूप धारण कर यहां सात्त्विक मानवों की रक्षा की थी। वे सूक्ष्म रूप में माता हैमवती (पार्वती), अपने गणों और देवों के साथ यहां निवास कर अभी भी सज्जनों और तपस्वियों की रक्षा करते हैं। उन केदारनाथ को प्रणाम है ॥ ८८ ॥ यह पर्वत कई दृष्टियों से साकार शंकर सा दिखाई देता है। सजल मेघों, घने सालवृक्षों और तमालों से नीलकण्ठ प्रतीत होता है तथा लाल पुष्पयुत पलाश और आम के वृक्षों एवं प्रातः सायं काल की सूर्य किरणों से शोण (रक्त) हो जाता है ॥ ८९ ॥

हिमार्कप्रभाश्वेतमेघाश्मगौरो विभात्येष गंगाधरः श्वेतकायः।
सदाशीःप्रदः प्रोन्नतैः शृंगहस्तैरयं व्योमकेशः प्रजानां सहायः ॥ ९० ॥
मृगैश्चन्दनैर्देवदार्वादिवृक्षैः सुगन्धिः प्रभूतप्रसूनौषधीभिः।
तथा पुष्टिदो भाति मीढुष्टमोऽयं पयोदैर्झरैः सत्पयोयुङ्नदीभिः ॥ ९१ ॥
पशूनां पतिः कुंजरैः कृष्णसारैः शशव्याघ्रसिंहप्लवंगैः कुरंगैः।
नटेशो मयूरैः पिकैः कीरहंसैः कपोतादिसुध्वानरूपैः पतंगैः ॥ ९२ ॥
मयोभूश्च मृत्युंजयस्तापहारी विशुद्ध्या नभोवातनीरक्षितीनाम्।
तपोभूमिभिर्भूरियोगीश्वराणां च सद्भावनायुङ्मनोभिर्मुनीनाम् ॥ ९३ ॥
भवन्त्यत्र चेतांसि शान्त्या हिमाद्रेरपि क्षुल्लकानां नृणां सात्त्विकानि।
तथा दर्शनाद्योगिनां सौधजायाधनापत्यवृन्दान्यरं विस्मृतानि ॥ ९४ ॥
कदापि त्यजन्तीह नो शान्तिलक्ष्मीप्रतिष्ठाः प्रजा वा यथा सन्नरेशम्।
तथा नो विमुञ्चन्त्यमुं योगिवर्या न गौरीमहादेवदेवा नगेशम् ॥ ९५ ॥

हिमालय सचमुच गंगाधर है और हिम, सूर्य की श्वेत किरणों, श्वेतमेघों और श्वेत पाषाणों से गौरवर्ण गंगाधर शंकर सा दिखाई देता है। यह अपने शृंगरूपी उन्नत हस्तों से हमें सदा आशीर्वाद दे रहा है, शिव की ही भांति व्योमकेश है और हमारा सहायक है ॥ ९० ॥ वेदों ने शिव को नील, लोहित, गौर वर्ण, व्योमकेश, सुगन्धि, पुष्टिवर्धन, मीढुष्टम (आनन्दवर्षक), पशुपति, नटराज, मयोभव, मृत्युंजय, योगीश्वर आदि कहा है। हिमालय पर्वत कस्तूरीमृगों से, चन्दन देवदारु आदि वृक्षों से तथा अनेक पुष्पों और औषधियों से सुगन्धि है, पयोदों, झरनों एवं स्वच्छ जलयुक्त नदियों से मीढुष्टम और पुष्टिप्रद है ॥ ९१ ॥ गजों, कृष्णमृगों, खरगोशों, बाघों, सिंहों, वानरों, मृगों आदि से पशुपति है और मयूरों, कोकिलों, शुकों, हंसों, कपोतों आदि सुशब्द, सुरुप पक्षियों से नटराज है ॥ ९२ ॥ आकाश, वायु, जल, पृथ्वी की विशुद्धि से, योगीश्वरों की अनेक तपोभूमियों से और सद्भावना युक्त मन वाले मुनियों से मयोभव (मुक्तिप्रद, आनन्दप्रद), मृत्युंजय और तापहारी है ॥ ९३ ॥

यहां हिमालय की शान्ति से और योगियों के दर्शन से क्षुद्र मनुष्यों के मन भी सात्त्विक हो जाते हैं तथा उत्कृष्ट गृह, पत्नी, धन, सन्तान आदि शीघ्र विस्मृत हो जाते हैं ॥ ९४ ॥ जैसे शान्ति, लक्ष्मी, प्रतिष्ठा और प्रजा कभी भी भले राजा का परित्याग नहीं करते उसी प्रकार योगीश्वर, उमा, शिव और देवगण इस नगेश को

प्रियं क्षेत्रवार्तावतां कर्षकाणां सगंगं मुहुर्नौमि केदारनाथम् ।
प्रिया यस्य गंगास्थितास्त्यूर्ध्वदेशे तमीडे हिमाद्रिप्रियं दीननाथम् ॥ ९६ ॥

घुसृणेशः

शिवस्यालये पुष्करेऽवेक्ष्य पुत्रं सपत्न्या हतं खण्डशोंऽगानि कृत्वा ।
विशोका तमापाशिषा यस्य घुष्मा तमीडे महादेव घुष्मेश्वरं त्वा ॥ ९७ ॥
इलायाः पुरें भित्तिषूत्कीर्णवन्तो गिरौ तत्र पद्मासनस्थं मुनीशम् ।
गुहाकारवः कुत्रचिद् बुद्धदेवं क्वचिच्छंकरं ध्यानमग्नं यतीशम् ॥ ९८ ॥
क्वचिद् भिक्षुकं चान्नपूर्णापुरःस्थं क्वचित्तस्य नेत्राग्निना कामदाहम् ।
क्वचित् सुन्दरस्यास्य कल्याणमूर्तेः समाधिं क्वचिद् हैमवत्या विवाहम् ॥ ९९ ॥
समुत्पाटयन्तं च कैलासमूलं क्वचिद्रावणं शंभुदासं विमूढम् ।
गिरेः कम्पमन्वीक्ष्य साश्चर्यमुत्कं क्वचित् शंकरं भीतगौर्योपगूढम् ॥ १०० ॥

कभी नहीं छोड़ते ॥ ९५ ॥ मैं इस पर्वत के निवासी उन दीननाथ प्रभु केदार (कृषियोग्य भूमि) नाथ को बार-बार प्रणाम करता हूं जिन्हें क्षेत्रजीवी कृषक और हिमालय बहुत प्रिय हैं तथा जिनकी प्रिया गंगा यहां उनके ऊर्ध्व (मस्तक) भाग में स्थित हैं ॥ ९६ ॥

शिवभक्त घुष्मा देवी ने देखा कि उसकी सौत ने उसके पुत्र के शरीर को खण्ड-खण्ड करके शिवालय के पास सरोवर में फेंक दिया है किन्तु उसने शोक छोड़ पूजन किया और शिव की कृपा से जीवित पुत्र पाया। उन घुष्मेश्वर महादेव को प्रणाम है ॥ ९७ ॥ उनके इस अवतार स्थान इलापुर में शिल्पियों ने पर्वत की भित्तियों में कहीं ध्यानमग्न साकार यतीश्वर शिव को उत्कीर्ण किया है तो कहीं उनके अवतार, पद्मासन में स्थित मुनीश्वर बुद्धदेव को ॥ ९८ ॥ भगवान् शंकर कहीं भिक्षुक के रूप में माता अन्नपूर्णा के सामने स्थित हैं तो कहीं अपनी नेत्राग्नि से कामदेव को भस्म कर रहे हैं। वे सुन्दर कल्याणमूर्ति कहीं समाधि में स्थित हैं तो कहीं उनका जगदम्बा हैमवती से विवाह हो रहा है ॥ ९९ ॥

कहीं अपने को शिवभक्त कहने वाला मूढ़ रावण उनके निवास स्थान कैलास पर्वत को उखाड़ने का प्रयास कर रहा है और पर्वत का कम्प देख आश्चर्य चकित शिव उत्कण्ठ होकर इधर-उधर देख रहे हैं तथा भयभीत गौरी से आश्लिष्ट हैं ॥ १०० ॥

क्वचिद्रावणेनार्चितं मस्तकैः स्वैः क्वचिद्रामचन्द्रार्चितं तारकारिम् ।
भवान्या क्वचिच्चाक्षखेलानुरक्तं क्वचिद्दारपुत्रप्रसक्तं पुरारिम् ॥ १०१ ॥
युता सप्तभिर्मातृभिः क्वापि दुर्गा गजश्रीः क्वचिन्माधवः शेषशायी ।
धनेशः सखा सेवते क्वापि नन्दी क्वचित् शंभवं वीरभद्रोऽनुयायी ॥ १०२ ॥
क्वचिद् बोधिसत्त्वं मुनिं पार्श्वनाथं महावीरतीर्थंकरं वर्धमानम् ।
क्वचिद् बोधिवृक्षं मयूरीं च तारां क्वचित् शंकरं किन्नरैः सेव्यमानम् ॥ १०३ ॥
क्वचित् सस्वरस्तंभतः स्तम्भयन्तो विचित्रप्रतिध्वानवन्तो विशालाः । सभामण्डपाः
कुड्यचित्रा महेशं जिनं गौतमं सेवितुं योगशालाः ॥ १०४ ॥
तां नौमि घुष्मां सुकृतप्रभावाद् या शंकरस्याप कृपां सुराणाम् ।
तान्नौमि विज्ञांश्च समानभक्त्या येऽर्चन्ति बुद्धं च जिनं शिवादीन् ॥ १०५ ॥

श्रुतौ सन्त्यहोरात्रनामानि शुक्रं च तेजस्वि तेजोऽमृतं चाभिजानत् ।
समृद्धं स्तुतं संस्तुतं श्रेय आयत् तपत् ज्ञानकल्याणयुक्तं च जानत् ॥ ९० ॥
सुतायुष्मती तर्पयन्ती च तृप्तिश्च कान्ता च कामप्रदा विश्वरूपा ।
इरा सूनृता पूरयन्ती च पूर्णा प्रपा पूर्णिमा पूर्यमाणा सुरूपा ॥ ९१ ॥
मुहूर्तो न निन्द्योऽस्ति मोदः प्रमोदो न कल्याणदः शोभनः शोभमानः ।
न दाता प्रदाता न शुक्रो न शान्तः प्रभानातपन् रोचनो रोचमानः ॥ ९२ ॥
न हि ज्योतिरानन्दवान्नो सुतेजा न चित्रो न केतुः प्रभुः संस्तुतो नो ।
न शान्तोऽभिजिन्नारुणो नो तपस्वान् समृद्धोऽमृतः प्रस्तुतो विष्टुतो नो ॥ ९३ ॥
शुभा कृत्तिकास्त्यग्निदेवस्य जाया शुभं ज्येष्ठभं चास्ति देवेशवासः ।
प्रिया देवयोरेतयोरस्ति राधा शरद्यर्कविष्णोर्भवत्यत्र रासः ॥ ९४ ॥

जाती हैं पर सत्य यह है कि नन्दा अनन्दा नहीं होती, पूर्णा अपूर्णा नहीं होती, भद्रा निन्द्या और अभद्रा नहीं होती, कोई तिथि मृता नहीं होती और किसी में छेद नहीं होता। भद्रा या कोई अन्य तिथि न तो आकाश में छेद करती है, न उसे भीषण बनाती है। रिक्ता में आकाश और भूतल रिक्त नहीं होते। ये मिथ्या कल्पनायें हैं ॥ ८९ ॥ वेद में कृष्णपक्ष के १५ दिनों के नाम संस्तुत, कल्याण, तेजस्वी, तेज, समृद्ध, शुक्र, अमृत, अरुण, भानुमान्, तपस्वत् आदि हैं। शुक्लपक्ष के १५ दिनों के नाम संज्ञान, विज्ञान, प्रज्ञान, जानत्, अभिजानत्, श्रेय, कल्याण आदि हैं। इन तीस में एक भी अशुभ नहीं है ॥ ९० ॥ कृष्णपक्ष और शुक्लपक्ष की तीस रातों के नाम हैं सुता आयुष्मती तर्पयन्ती तृप्ति कान्ता कामदुघा काम्या सूयमाना इरा सूनृता पूरयन्ती पूर्णा दर्शा सुदर्शना आदि। इनमें एक भी अशुभ नहीं है (देखिये मेरा ग्रन्थ, हमारा ज्योतिष और धर्मशास्त्र) ॥ ९१ ॥

वेद में शुक्लपक्ष के दिवसों के १५ और रात्रि के १५ मुहूर्तों का वर्णन है। यही स्थिति कृष्णपक्ष की भी है। दोनों में ६० मुहूर्त हैं और उनमें एक भी अशुभ नहीं है। शुक्लपक्ष के मुहूर्त हैं-मोद प्रमोद कल्याण शोभन शोभमान ज्योतिष्मान तेजस्वान् रोचन रोचमान दाता आनन्द संशान्त आदि ॥ ९२ ॥ कृष्णपक्ष के मुहूर्त हैं तेजस्वी आनन्द संस्तुत शान्त समृद्ध अमृत आदि ॥ ९३ ॥
वेदों का सर्वश्रेष्ठ देव इन्द्र है। उसे सुरेश कहते हैं और उसके बाद द्वितीय स्थान अग्निदेव का है किन्तु वेदों का प्रारंभ प्रायः अग्नि शब्द से ही होता है। वेदों में प्रथम नक्षत्र कृत्तिका है और उसका पति अग्नि है। कृत्तिका अग्नि की पत्नी है

प्रिया शंकरस्यार्द्रचित्तास्ति चार्द्रा ददात्यम्बु साऽऽदौ वसूनां धरायै ।
प्रदत्ते श्रियं शर्म माता पुनः सा वसूनौषधीः सर्वमन्नं प्रजायै ॥ ९५ ॥
जलेशाम्बुसर्पप्रियाः सन्ति पूताः शुभा भद्रपादास्ति शस्तं भगर्क्षम् ।
सुराणां गुरोर्वेश्म पुष्यः प्रशस्तो वसूनां निवासो धनिष्ठा शुभर्क्षम् ॥ ९६ ॥
करोत्यम्बरं साम्प्रतं किन्तु भीमं क्वचिद् भैश्च तिथ्यादिभिर्वारयोगः ।
समुत्पद्यते तेन वज्रं च मृत्युर्विषं कण्टकं कालदण्डः कुयोगः ॥ ९७ ॥

और क्षेत्र है। इसी प्रकार ज्येष्ठा इन्द्रदेव की पत्नी और निवासस्थान है, गृह है। अतः वेद में ये दोनों नक्षत्र परम शुभ हैं किन्तु आज के ज्योतिष में दोनों हर कर्म में त्याज्य हैं, तीक्ष्ण हैं, दारुण हैं और ज्येष्ठा में उत्पन्न बालक त्याज्य है। राधा (विशाखा) इन दोनों की प्रिया है। शरद् ऋतु में जब अर्क (सूर्य) रूपी विष्णु इसके पास पहुंचते हैं तो उनकी रासलीला होती है। चित्रा, अनुराधा आदि उसकी सखियां हैं किन्तु आज के ज्योतिष में राधा तीक्ष्ण है, दारुण है, हरकार्य में निषिद्ध है और समाज को यह निर्णय मान्य है ॥ ९४॥ यही स्थिति आर्द्रा आदि की है। वेद में आर्द्राशिवप्रिया है, आर्द्रचित्ता (दयामयी) है और प्रथम वर्षा आर्द्रा में ही होती है। उसके बाद पुनर्वसु (नया अन्न धन), पुष्य (पोषण) और आश्लेष आदि आते हैं। माता आर्द्रा धरती को आर्द्र करने के बाद वसुंधरा को श्री, कल्याण, वसु, औषधी और प्रजा को अनेक अन्न देती है ॥ ९५ ॥ वरुण, जल, सर्प के नक्षत्र घनिष्ठा, आषाढ़ा, आश्लेषा परम शुभ हैं, भद्रपदा का तो नाम ही मांगलिक है, भगदेव की प्रिया भगवती फाल्गुनी भी वैसी ही हैं, देवगुरु का नक्षत्र पुष्य पोषक है पर आज सब अशुभ हैं। पूर्वा फाल्गुनी, पूर्वाषाढ़ा, पूर्वाभाद्रपदा, भरणी इस समय उग्र क्रूर हैं और घनिष्ठा से रेवती तक पांच नक्षत्र भीषण हैं। वेद में सर्प वह है जो सरकता है। देव, शंकर, और समाजसेवक मुख्य सर्प हैं पर आजकल सब विवाह आदि में वर्जित हैं ॥ ९६ ॥

वेद में सब, तिथियां, नक्षत्र और ग्रह शुभ हैं किन्तु भारत में विदेशी वारों के आगमन के बाद ज्योतिषियों ने लिख दिया कि वारों का कुछ तिथियों और नक्षत्रादिकों से योग हो जाने पर अनेक भीषण योग बन जाते हैं। सोम वार और उत्तराषाढ़ा नक्षत्र, दोनों शुभ हैं पर उनसे मृत्यु योग बनता है। बुध वार और रेवती के योग से उत्पात योग बनता है। शुक्रवार और रोहिणी का योग यमघण्ट हो जाता है। गुरुवार का उत्तराफाल्गुनी, रोहिणी और मृग से योग होने पर दग्ध,

न किन्त्वीशनेत्रं सुधावर्षकोऽर्कः सुरात्मास्ति पापः सुरांशुर्ग्रहेशः ।
न षण्ढौ शनिज्ञौ खलो मंगलो नो न नारी च शुक्रो न चन्द्रो द्विजेशः ॥ ९८ ॥
प्रसादात् श्रुतेर्निर्भयं चित्तमासीद् यदीशान नित्यं प्रसन्नं सुधाभम् ।
तदेवाधुना कल्पितानां भयानां व्रजैरस्ति जातं विभीतं विषाभम् ॥ ९९ ॥
मनःशक्तिहीनाः समे सन्ति भीता नराः कल्पितैर्भूरिदोषैर्दिनानाम् ।
भयैः खेटभानां दिशां चायनादेस्तिथीनामृतूनां च योगादिकानाम् ॥ १०० ॥
अहं किन्तु मन्ये निकृष्टं न कंचित् सुरं वा निसर्गात् क्षणं वासरं वा ।
न निन्द्यं भगेशाग्निशक्रादिगेहं न सूर्यं शनिं मंगलं खेचरं वा ॥ १०१ ॥

उत्पात और मृत्यु योग बनते हैं। पृथ्वी, वायु और आकाश को भयंकर बनाने वाले अन्य योग हैं वज्र, विष, कण्टक, कालदण्ड, रोग, उद्वेग, ध्वांक्ष, घोर, मृत, दग्ध, यमघण्ट, अधम, अग्नि, काण, लुम्ब, मुसल, मुद्गर, मातंग, राक्षस, केतु आदि ॥ ९७ ॥ किन्तु सत्य यह है कि शंकर का नेत्र, सारे जगत् का आत्मा अमृत का वर्षक और ग्रहों का स्वामी वह सूर्य पापग्रह नहीं हो सकता जिसकी किरणों को वेदों ने देव देवी कहा है। इसी प्रकार आज के ज्योतिष ने शनि बुध को नपुंसक, मंगल को खल और शुक्र एवं द्विजेश चन्द्र को नारी कहा है। यह भी मान्य नहीं है। वस्तुतः इन योगों में आकाश, वायुमण्डल आदि भीषण नहीं हो जाते ॥ ९८ ॥

चक्षोः सूर्यो अजायत । सूर्यचन्द्राग्निनयनः । निवेशयन्नमृतं
याति देवः सूर्य आत्मा जगतस्तस्थुषश्च । बण्महानसि सूर्य
महानसि श्रवसा महानसि । असौ यस्ताम्रो अरुण उत बभ्रुः
सुमंगलः । सोमोस्माकं ब्राह्मणानां राजा । बृहस्पतिः प्रथमं
जायमानः । तेजोसि शुक्रमस्यमृतमसि (यजुर्वेद) ।

हे ईशान! वेदों की कृपा से समाज का जो चित्त निर्भय, सर्वदा प्रसन्न और अमृत तुल्य था वही अब अनेक काल्पनिक भयों से भयभीत और विष तुल्य हो गया है ॥ ९९ ॥ सब मनुष्य दिन, ग्रह, नक्षत्र, अयन, ऋतु, तिथि, योग और दिशा आदि के अगणित दोषों को सुन कर मनोबल से विहीन और भयभीत हो गये हैं ॥ १०० ॥ किन्तु मैं यह मान चुका हूं कि न कोई देव निकृष्ट है न कोई क्षण, वार आदि। सब कालमानों का देवों से सम्बन्ध है। कहीं रवि का वार है तो कहीं शिव का नक्षत्र है तो कहीं दुर्गा की तिथि है। भग, शंकर, अग्नि, इन्द्र आदि के

भजे सर्वदिग्देशकालग्रहस्थं विभो पार्श्वपृष्ठस्थमग्रेसरं त्वा।
हृदा सर्वदा सर्वयोगार्क्षसंस्थं विदेहं यतीनां सतां शंकरं त्वा ॥ १०२ ॥

जानीहि हे मित्र तवार्तहेतुर्नो दुर्मुहूर्तोऽस्ति न कोऽपि खेटः।
संगो धनाप्तेः करणानि पित्रोस्ते कर्म पूर्वं नवमत्र हेतुः ॥ १०३ ॥

नक्षत्र न तो अशुभ हैं, न सूर्य मंगल शनि ग्रह पाप हैं ॥ १०१ ॥

मैं हृदय में सर्वदा उन शंकर का स्मरण करता हूं जो हर देश काल ग्रह योग और नक्षत्र में और आगे पीछे दायें बायें स्थित हैं तथा सज्जनों के शंकर (कल्याणकारी) हैं ॥ १०२ ॥

ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत् (यजु ४०।१)
पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् (यजु ३१।२)
संवत्सरोमासोऽहोरात्रोऽयनं प्रजापतिः (प्रश्नोपनिषत्)
एषोह देवः प्रदिशो नु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः (यजु ३२।४)
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः।
सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः (श्वेत उप)
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरो मुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति (गीता १३।१३)
सोऽन्तरादन्तरं प्रादिशत्, प्रांचः प्रत्यंचोहं दक्षिणामु
दंचोऽहं दिशः प्रदिशश्चाहं मध्यं बहिः पुरस्तात्

योऽग्नौ रुद्रो योऽप्स्वन्तर्य ओषधीर्वीरुध आविवेश।
य इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमः (अथर्व, उप) ॥

हे मित्र! जान लो, तुम्हारे दुःख का कारण अशुभ मुहूर्त या ग्रह नहीं है। मुहूर्तों के नाम, क्रम और ग्रहों के फल तो बदलते रहते हैं। दुःख के हेतु हैं, कुसंग, धनप्राप्ति के साधन और तुम्हारे तथा पूर्वजों के नये पुराने कर्म ॥ १०३ ॥

नरो हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः ।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी लभते न कष्टम् ॥ १०४ ॥

हित आहार विहार का सेवी, दूरदर्शी, जितेन्द्रिय, दाता, दूसरों के दुःख से दुखी, सत्यनिष्ठ, क्षमावान् और महान् पुरुषों का सेवक कभी कष्ट नहीं पाता (चरकसंहिता) ॥ १०४ ॥

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् १४।१६ ॥
ऊर्ध्वं गच्छन्ति सत्त्वस्था अधो गच्छन्ति तामसाः १४।१८
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमम् १८।१४
पंचैतानि महाबहो कारणानि निबोध में १८।१३ गीता
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि (गरुडपुराण)

चतुर्थोऽध्यायः

आधुनिकं ज्यौतिषम्

अयि शिक्षित पृच्छसि चन्द्रबलं शुभलग्नमुहूर्तयुतं सुदिनम् ।
न हि वेत्सि न निर्मितवान् भगवान् प्रियसन्ततिहानिकरं कुदिनम् ॥ १ ॥
अवधेहि शुभं निर्ऋतं निर्ऋतं पितृभं च मघां भरणीं भरणीम् ।
शिवभं च यदार्द्रतरां च पुवर्वसुपोषणदां कुरुते धरणीम् ॥ २ ॥
यदि नूतनदैवविदां सकलं वचनं मनुषे हितसत्यमलम् ।
सुलभं न हि दोषसमुद्रगतं सुदिनं तव वर्षशतैर्विमलम् ॥ ३ ॥
बहुकर्मसु पश्यसि देवगुरोर्बुधचन्द्रमसोश्च भृगोरुदयम् ।
न हि चेच्छसि सूनुसुतोपयमे ग्रहदीप्तिनिदानखेरुदयम् ॥ ४ ॥

मेरे शिक्षित भाई! तुम ज्योतिषी से चन्द्रबल और शुभलग्न एवं शुभ नक्षत्र, शुभवार, शुभतिथि, शुभयोग, मुहूर्त आदि से युत सुदिन पूछ रहे हो पर यह भूल गये हो कि दयालु भगवान ने अपनी प्रिय सन्तान के लिये कोई कुदिन नहीं बनाया है ॥ १ ॥ ज्योतिषी ने मूल नक्षत्र को अशुभ कहा है, उसमें उत्पन्न शिशुको फेंकने का आदेश दिया है पर वह नक्षत्र आकाशगंगा का मूल है। उसका स्वामी निर्ऋत राक्षस कहा जाता है पर उस शब्द का अर्थ है, पूर्ण ऋत (सत्य)। पितरों का नक्षत्र मघा भी शुभ है। ज्योतिषी ने इनको, शिव के नक्षत्र आर्द्रा को और तीनों पूर्वाओं को उग्र, क्रूर, तीक्ष्ण और दारुण कहा है किन्तु ये सब शुभ हैं। मघा और मूल में आज भी विवाह होते हैं। पितर हमारे पूज्य हैं, भरणी भरण करती है और शिव का नक्षत्र आर्द्रा तो पृथ्वी को जल से आर्द्र कर हमें पुनः वसु और पोषण (पुष्य) देता है ॥ २ ॥ ज्योतिषियों ने दोषों का एक सागर तैयार किया है अतः तुम यदि उनके सब वचनों को अलं (पूर्ण) हितावह और सत्य मानते हो तो जान लो कि तुम्हें विमल (दोषरहित) दिन सौ वर्षों में भी नहीं मिलेगा ॥ ३ ॥ तुम हर कर्म में देवगुरु, बुध, चन्द्रमा और शुक्र नामक शुभग्रहों का उदय देखते हो पर अपने पुत्र पुत्री का उपयम (विवाह) उस सूर्य के अस्त (रात्रि) में करते हो जो सब ग्रहों की

उदितैरपि किं निखिलैः खचरैर्हृदये यदि नास्ति शिवाभ्युदयः ।
प्रददाति मुदं हृदि शुक्रबुधाद्युदयश्च शिवाशिवयोरुदयः ॥ ५ ॥
अवधेहि तवास्ति तदेव हितं सुदिनं च खगोडुमुहूर्तबलम् ।
कुरुषे स्वशुभाचरणैर्यदुमां जनतां मुदितां हृदयं विमलम् ॥ ६ ॥
प्रवदन्ति हि दैवविदो वपुषः स्फुरणं स्खलनं करटादिखान् ।
सरठाद्युपपातशिवादिपशून् स्थितिभेदवंशादशिवांश्च शिवान् ॥ ७ ॥
प्रतिराहुबुधक्षितिजा न शुभाः प्रविशेन्न गृहे यदि दक्षरविः ।
कुशलाय न पृष्ठगवामविधुः सुफलाय न पृष्ठगवामकविः ॥ ८ ॥

दीप्ति का निदान (हेतु) है, सबका पिता है। तुम सूर्य को पापग्रह कहते हो और उसके प्रकाश से प्रकाशित बुध, गुरु, शुक्र को शुभ ग्रह मानते हो ॥ ४ ॥

वेदमत में शरीरस्थ शुक्र और बृहस्पति का अर्थात् वीर्य और सुमति का उदय ही वास्तविक उदय है। उस समय छोटे बच्चों और अरजस्का कन्याओं का विवाह नहीं होता था।

हे विद्वन्! इन खचरों (ग्रहों) के उदय की प्रतीक्षा मत करो। ये और तारे तो प्रतिदिन हमें चार प्रहर दर्शन देते रहते हैं। केवल क्षितिज के नीचे जाने पर अस्त होते हैं। हृदय में परमात्मा अस्त हैं, सोये हैं तो इनके उदय से कोई लाभ नहीं है। प्रमोद तो तब मिलता है जब हृदय में शुभ ग्रहों का, देवों का और शिवा शिव का उदय होता है ॥ ५ ॥ भली भांति जान लो, तुम्हारा हित, सुदिन, ग्रहबल, उडु (नक्षत्र) बल और मुहूर्त बल वही है जब अपने सदाचार से माता उमा को और जनता को प्रमुदित कर देते हो, जब तुम्हारा हृदय निर्मल रहता है, जब सबका आशीर्वाद मिलता है ॥ ६ ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषां हृदिस्थो भगवान् मंगलायतनो हरिः ।

हे मन! दैवविद् (ज्योतिषी) कहते हैं कि भिन्न भिन्न अंगों के स्फुरण के, गिरगिट, छिपकली आदि के पतन के, सियारिन लोमड़ी आदि के दर्शन के, वस्त्र खिसकने के और काक आदि के शब्दों के परिस्थिति के अनुसार शुभ अशुभ अनेक फल होते हैं ॥ ७ ॥ राहु, बुध, मंगल अनेक स्थितियों में भयंकर हो जाते हैं। रवि के दायें रहने पर गृहप्रवेश नहीं होता तथा पीछे और बायें रहने पर विधु और कवि

शकुनाब्धिमगाधमिमं जहिहि त्यज वामगदक्षिणगव्यसनम् ।
त्यज खेट शुभाशुभतां हस मा विकलांगदुराकृतिदुर्वसनम् ॥ ९
व्रणिमूकजडान्धदरिद्रनरा बधिरा विधुरा विधुता विधवाः ।
यदि यन्ति मदक्षयकुष्ठरुजाः पुरतः क्षुतकासितभीतरवाः ॥ १० ॥
परुषोक्तिमनादरकाकुघृणा अपहाय च दुःशकुनोत्थभयम् ।
प्रियवागनुरागयुतः सदयो भव पश्य च तत्र शुभातिशयम् ॥ ११ ॥
दिवि सन्ति खगाश्च नृभावखाः पवना ध्रुवसप्तमहर्षिगणाः ।
मृगलुब्धककुंभजविष्णुपदीबहुपुच्छलदीप्तिनगा भगणाः ॥ १२ ॥
न हि सर्वफलं विदुरात्मविदः कपिलात्रिकणादपतंजलयः ।
न हि दैवविदश्च विदुः सकलं भृगुगर्गपराशरजैमिनयः ॥ १३ ॥

(शुक्र) भीषण हो जाते हैं ॥ ८ ॥ पर मैं कहता हूं कि तुम शकुनों के इस अगाध सागर को, ग्रहों के दायें बायें आगे पीछे रहने के विचारव्यसन को और उनके शुभाशुभत्व की भावना को छोड़ दो तथा एक बात का सदा ध्यान रखो कि जनता ज्योतिषियों के कहने से विकलांग, कुरूप और मलिन या फटे वस्त्र वाले दरिद्र मनुष्य को अपशकुन मानती है। उसको देख कर तुम न हंसो न अपशकुन मानो ॥ ९ ॥ यदि तुम्हारे सामने व्रणी (घाव वाले), मूक, जड़, अन्धे, दरिद्र, बधिर, विधुर (पत्नीहीन) मनुष्य आते हैं, विधवायें आती हैं, उन्माद क्षय और कुष्ठ के रोगी आते हैं, छींक खांसी और भयभीत के शब्द आते हैं ॥ १० ॥ तो अपशकुन का भय छोड़ दो। उनके साथ कटु भाषा, अनादर, काकु (विकृत ध्वनि), और घृणा का प्रयोग मत करो। प्रिय वाणी अनुराग और दया से युत होकर उनमें शुभ शकुन देखो ॥ ११ ॥ इस बात का सदा ध्यान रखो कि आकाश में खग (ग्रह) हैं तो मनुष्यों के काम, लोभ, कोप, मोह, शान्ति, दया, क्षमा, उत्साह आदि नाना प्रकार के मनोभाव भी हैं, भले बुरे अगणित रव (शब्द) भी हैं, असंख्य पवन भी हैं, धूम हैं, ग्रहों से विशाल धूमकेतु, उल्का, नीहारिकायें हैं। ध्रुव, सप्तर्षिगण, मृगव्याध, अगस्त्य, आकाशगंगा के अगणित तारे, पुच्छल तारे हैं और भगणों (अश्विनी आदि नक्षत्रों) के ऐसे तारे हैं जो ग्रहों से बहुत बड़े हैं तथा दीप्ति के नग (पर्वत) हैं तो क्या केवल ग्रहों का ही प्रभाव पड़ेगा? ॥ १२ ॥

सच पूछो तो इन सबों के मिश्रित फल को कपिल, अत्रि, कणाद, पतंजलि आदि आत्मवेत्ता योगी भी पूरा पूरा नहीं जान सके। इनके सारे फलों को महान्

मुनिगौतमपुत्रवसिष्ठमुखा बुधकौशिककल्पमहामुनयः।
प्रभुरामविवाहमकुर्वत भे सुखदे ग्रहतत्त्वविदो यतयः ॥ १४ ॥
यजमान इहेन्द्रसखाजसुतो जनकश्च गुरुर्गुरुबोधवताम् ।
अगमन् मृतिबन्धुवियोगरणा अशुभानि बहूनि विदेहसुताम् ॥ १५ ॥
प्रशशंस पुरा बहुरामगुणान् हृदि संसदि केकयराजसुता ।
अधिकं भरतादपि हार्दमभूदथ तत्र ततोप्यधिका ममता ॥ १६ ॥
गुरुशिष्टसमुत्सुकमंत्रिमतादभिषेक्ष्यति भूपपदेऽस्य पिता ।
मम राम इलाधिपतिर्भवितेति निशम्य बभूव परं मुदिता ॥ १७ ॥
निजदास्युपहारकृते त्वरया बहुमूल्यनिजाभरणान्यददात् ।
सुररामकुटुम्बकृते भगभं च मुहूर्तबलं न हि भद्रमदात् ॥ १८ ॥

ज्योतिषी भृगु, गर्ग, पराशर, जैमिनि आदि भी नहीं जान सके ॥ १३ ॥ महर्षि गौतम के पुत्र महापण्डित श्रीशतानन्द जी राजर्षि जनक के और महर्षि वसिष्ठ तथा विश्वमित्र राजा दशरथ के पुरोहित थे। ग्रहतत्त्ववेत्ता कहे जाने वाले इन यतियों ने परमशुभ भग नक्षत्र में, मार्गशीर्ष मास में, सुयोग में और सुमुहूर्त में सीताराम का विवाह किया ॥ १४ ॥ इस विवाह में इन्द्र के मित्र और महाराज अज़ के पुत्र दशरथ तथा प्रबुद्ध पुरुषों के गुरु जनक जी यजमान थे फिर भी दशरथ की कष्ट से अकालमृत्यु हुई, राम की मातायें विधवा हो गई, बन्धुओं का वियोग हुआ, वनवास हुआ, सीताहरण के बाद घोरयुद्ध हुआ और विदेहसुता सीता पर अन्य अनेक आपत्तियां आईं ॥ १५ ॥

राम के विवाह के पूर्व एक ऐसा शुभ समय था कि कैकेयी हृदय में और सभा में राम के गुणों की बार-बार प्रशंसा करती थी। उसके हृदय में राम के प्रति भरत से अधिक स्नेह था और अधिक ममता थी ॥१६॥ उसने सुना कि वसिष्ठादि गुरुजन, मन्त्रिगण और अयोध्या के अन्य शिष्ट जन राम का राज्याभिषेक देखने के लिये अति उत्सुक हैं। अतः महाराज दशरथ उनकी संमति के अनुसार वह महोत्सव करने जा रहे हैं। मेरा राम धरती का स्वामी होने जा रहा है, यह समाचार सुन कर कैकेयी अतिशय प्रसन्न हो गई ॥ १७ ॥ उसने यह समाचार सुनाने वाली दासी को उपहार में कई बहुमूल्य आभरण दे दिये किन्तु विवाह वाला भगदेव का शुभ नक्षत्र, शुभ लग्न और मुहूर्त का बल देवस्वरूप राम को और उनके कुटुम्ब एवं स्वजनों को भद्र (मंगल) नहीं दे सका ॥ १८ ॥

सति लग्नमुहूर्तबले यवनैर्बहुधा बहुभूपतयो निहताः ।
रहितैरपि तेन बलेन खलैर्बहुदेवलविप्रवराश्च हताः ॥ १९ ॥
अतएव वदामि कृतिन् नृकृतेः फलदं सुकृतैर्भज साम्बहरम् ।
वद देहि विभो सुमतिं च दमं त्रिपुरान्तक नौमि पिनाकधरम् ॥ २० ॥
शिव शंकर शंभव शाश्वत शर्मद शान्तिद हे शतशक्तिपते ।
शशिशेखर शर्व शरण्य शठान्तक शक्ल शुचे शुचिशान्तगते ॥ २१ ॥
सवितः सनकादिकसिद्धसुरासुरसेव्य सतीश सतां सुहृदम् ।
सुषमासदनं सितसूरतसौम्य सरामि समृद्धिसृतिं सुखदम् ॥ २२ ॥
स्मरशत्रुसुहोत्रसहिष्णुसुपालक शूलिशिखण्ड्यवतार भजे ।
ससुमन्तुसुभद्रकसंजयशिष्यसभाजन साम्ब सुतार यजे ॥ २३ ॥

हे मित्र! हमारे ज्योतिष ग्रन्थों में दिग्विजय के कई सौ प्रबल लग्न, मुहर्त लिखे हैं किन्तु उनके रहते यवनों ने हमारे देश पर अनेक बार आक्रमण किये और अनेक नृप मारे। वे हत्यारे मुहूर्त पूछ कर नहीं आये थे, उनसे अपरिचित थे फिर भी उन्होंने हमारे अनेक देवलों (पुजारियों) और विप्रवरों को मारा तथा अनेक मन्दिर तोड़े ॥ १९ ॥ अतः हे कृतिन् (कुशल) मित्र! मेरा कहा मानो। तुम मनुष्यों के कर्म के फलदाता उमाशंकर की अपने सत्कर्मों द्वारा उपासना करो। उनसे कहो कि हे विभो! हे त्रिपुरान्तक पिनाकधर शिव! आप को प्रणाम है। हमें कृपया सुमति और दम (उत्साह) दें तथा इस भ्रम से मुक्त करें ॥ २० ॥ हे प्रभो! आप शिव (मांगलिक), मंगलप्रद, मंगलबीज, शाश्वत, कल्याणप्रद, शान्तिप्रद, सैकड़ों शक्तियों के स्वामी, दुःखहारी, शरणागतवत्सल, दुष्टहन्ता, शक्ल (प्रियंवद), शुचि, शुचिशान्त के रक्षक आदि हैं। पूरा ब्रह्माण्ड आप का शरीर है और चन्द्रमा आप के सिर का आभूषण है ॥ २१ ॥ हे सवितः (संसारके पिता)! आप सनक, सनन्दन, आदि सिद्धों, सुरों और असुरादिकों से सेवित हैं। सतीश, सज्जनों के मित्र, सौन्दर्य के सदन, गौर, सूरत (दयालु), सौम्य, समृद्धि के सुमार्ग और सुखद हैं। मैं आप का अनुसरण कर रहा हूं ॥ २२ ॥

(शिव के सुहोत्र सहिष्णु आदि २४ योगेश्वरावतार हैं और सुमन्तु आदि ११२ मुख्य शिष्य हैं)। हे साम्ब सदाशिव! मैं इन कामेश्वर, सुहोत्र, सहिष्णु, सुपालक, सुतार, दधिवाहन, दारुक, दम, सुमन्तु, सुतार आदि का यजन भजन करता हूं ॥ २३ ॥

भगवन् भव भास्वर भर्ग भिषग् भजतां भ्रमभंजन भूतिपते ।
भुवनेश भजेऽभ्रभुजंगमभूषण भैरव भूतप भक्तगते ॥ २४ ॥
मुनिमानसमन्दिरमंगलमूर्तिमहेश मनोन्मन मृत्युंजयम् ।
मदनेश मयोभव नौमि मृडं मम मृष्य मयस्कर मन्त्वनयम् ॥ २५ ॥
तुद तत्पुरुष त्रिपुरान्तक मा त्वयि तत्परमार्ततरं तनयम् ।
त्रिदशेश्वर तारय तारकजित् त्यज तात तिरोहिततातिशयम् ॥ २६ ॥
नवनिर्मलनीरदनीलतनुं नकुलीश नमामि नतार्तपतिम् ।
नरसिंहनियामक निर्जरनायक नारद निर्मल नारसृतिम् ॥ २७ ॥
नगराजनिकुंजनिकेतन नौमि नरेशनिधीशनमस्यनुतम् ।
निकटे नय नाथ निराश्रयनारनिदान नटेश निजं निभृतम् ॥ २८ ॥

हे भव! आप ऐश्वर्य, धर्म, यश, श्री, ज्ञान, वैराग्य आदि अनेक भगों से युत होने के कारण भगवान् हैं। आप का शरीर तेजस्वी है अतः आप भास्वर, भर्ग कहे जाते हैं। वेदों ने आप को भिषक्तम (वैद्यनाथ) कहा है। आप सारी विभूतियों के स्वामी हैं, भक्तों के भ्रम कष्ट के भंजक हैं, तीनों लोकों के स्वामी हैं। अभ्र (मेघ) रूपी सांप आप के आभूषण हैं, आप दुष्टों के लिये भैरव हैं, सब भूतों (जीवों) के स्वामी हैं और भक्तों के मार्गदर्शक हैं। आप को प्रणाम है ॥ २४ ॥

हे महेश्वर! मुनियों के मानस आप के मन्दिर हैं और आप मंगलमूर्ति उनमें सदा जागृत और उदित रहते हैं। आप मनोन्मनी (समाधि) अवस्था के दाता और स्वयं मनोन्मन हैं। भक्तों की दरिद्रता, व्याधि, अज्ञान आदि मृत्युओं के विध्वंसक हैं। कामेश्वर, मुक्तिप्रद और मृड (आनन्दप्रद) हैं। हे मयस्कर! मेरे हृदय से अनीति क्रोध आदि को समाप्त करें और मुझ पुत्र के अपराधों को क्षमा करें ॥ २५ ॥

हे त्रिपुरारे! मैं आप के चरणों में तत्पर आप का एक आर्ततर पुत्र हूं। हे तत्पुरुष शिव! अब मुझे त्रास न दें। हे देवेश्वर तारकेश्वर! मुझे इस चिन्तासागर से तार दें। हे तात! अब इस अति तिरोहितता (अदृश्यता) को छोड़ दें ॥ २६ ॥

हे नकुलीश! आप का एक शरीर नूतन, निर्मल मेघ की भांति नील है। आप नतों और आर्तों के पालक हैं। हिरण्यकशिपु का वध करने के बाद अति कुपित नरसिंह भगवान् को आप ने शरभावतार ले कर शान्त किया। आप निर्जरों (देवों) के नायक, आनन्दप्रद, निर्मल और नार के मार्ग हैं ॥ २७ ॥

नगराज हिमालय के वृक्षों का निकुंज ही आप का गृह है। आप निर्दोष नारद, नन्दी आदि से नुत हैं, निराश्रयों की शान्ति के हेतु हैं, और निधीश (कुबेर),

द्रव दावदरीप्रिय दैवत मे द्रुतमेहि दिगम्बर देहि वरम् ।
दमयेश दयामय दर्शनतो दुरितानि दुराशय दस्युमरम् ॥ २९ ॥
गिरिशन्त गिरित्र गुणाकर गीतगुरो गुरुगन्धगभस्तिवहम्
गिरिजेश गृणामि गणाधिप गात्रगभीरगुहागृहगूढमहम् ॥ ३० ॥
पृथुकप्रमदापरतन्त्रपणस्पृहमप्युदेष्टृपदे प्रथितम् ।
पुरुषापसदं पुरुषार्थमपास्य परार्पितपानपचापुषितम् ॥ ३१ ॥
प्रियतापरिपूर्णपवित्रहृदा परिपालितयाऽथ पुरस्कृतया ।
परिभूतमपासितमप्रतिभं प्रसभं परवत् परुषप्रजया ॥ ३२ ॥
परितापपरिष्कृतमप्रगुणं परिचारकमीश पदप्रसितम् ।
पृथुपातकपीवरपाशपशुं पशुपालक पाहि पुनीहि नतम् ॥ ३३ ॥

नरेशों तथा नमस्यों (पूजितों) से पूजित हैं। हे नटराज! अब इस अपने निभृत (सेवक, भक्त) को निकट बुला लें ॥ २८ ॥ हे मेरे दैवत! आप कुबेर इन्द्र आदि के पूज्य होकर भी दाव (वन) और दरी (गुहा) में ही रहते हैं। हे दयामय! वन में आप दिगम्बर हो जाते हैं। प्रभो! शीघ्र आवें और वर दें। अपने दर्शन से हमारे दुरितों (पापों) और दुराशय रूपी दस्युओं का अरं (शीघ्र) दमन कर दें ॥ २९ ॥ मैं आप के उस रूप को ग्रहण करता हूं जो गिरि में शयन करता है, वहां रह कर हमारा त्राण करता है, गुणों का निधान है, गीत का गुरु है, उच्च गन्ध और गभस्ति (किरण प्रकाश) का वाहक है, गणपति है, हमारे गात्र के गुहागृह में गूढ़ है और माता गिरिजा का उपास्य है ॥ ३० ॥ हे नाथ! हम पृथुकों (पुत्रों) और पत्नी के जाल में फंसे परतन्त्र हैं, पण (धन) के लोभी हैं, पुरुषाधम हैं, पुरुषार्थ को छोड़ दूसरे द्वारा दिये पान और भोजन से पुषित हैं, फिर भी उपदेशक के पद में सुप्रसिद्ध हैं ॥ ३१ ॥ स्नेह से परिपूर्ण पवित्र हृदय से जिनका परिपालन किया, जिन्हें पुरस्कृत किया उन्हीं परुष (कठोर) प्रजाओं द्वारा अब पराये की भांति प्रसभ (बलपूर्वक) पराजित कर के तिरस्कृत हैं। अब हमारी प्रतिभा निरर्थक हो गई है ॥ ३२ ॥

अब पश्चात्ताप से परिष्कृत हम अप्रगुण (व्याकुल) हैं। हे ईश! बड़े पातकों रुपी दृढ़ पाश से बंधे हम पशु अब आप के परिचारक (दास) हैं, चरणों में आसक्त हैं, नत हैं। आप का नाम पशुपति है। अतः हमारे हृदयों को पवित्र कर हमारी रक्षा करें ॥ ३३ ॥

पुरुपण्डितपूग्ममवेक्ष्य मखे परतत्त्वपराङ्मुखमर्थपरम् ।
पृथिवीसुरपूज्यपुरोहितपूतपरार्घ्यविपश्चिदुपाधिधरम् ॥ ३४ ॥
पशुपक्षिपलादपरिस्रुदिरापमुपाकृतपीडनपिंजपरम्।
प्रविहाय परिग्रहपापजदुष्परिपाकभयं प्रभुकोपदरम् ॥ ३५ ॥
प्रविलोक्य प्रजापतिदक्षमपि प्रतिकूलमतिं प्रवयस्पितरम् ।
परिणाममुपेक्ष्य परेशपथप्रदपुण्यसवप्रतिपक्षपरम् ॥ ३६ ॥
प्रणयार्द्रमपि प्रतिघालुहरं प्रणमामि पृषत्कपिनाककरम् ।
पृथुपुण्यहरं च सतीसुपितुः परिचिन्त्य परःशतपापभरम् ॥ ३७ ॥

हमने सुना और देखा कि बड़े-बड़े पण्डितों के अनेक पूग (समूह) यज्ञशाला में बैठे हैं। वे परमतत्त्व से विमुख और धन के इच्छुक हैं फिर भी उनकी भूसुर, पूज्य, पुरोहित, पवित्र, परमपूज्य और विद्वद्वर आदि अनेक उपाधियां हैं ॥ ३४ ॥

वे परिग्रह (दान लेने) के पाप से उत्पन्न दुष्परिणाम के और प्रभु के कोप के भय का परित्याग कर उन यज्ञों में रत हैं जिनमें पशु पक्षियों का पल (मांस) खाया जाता है। परिस्रुत् (मदिरा) और इरा (गन्धवती मदिरा) का पान होता है। उपाकृत (मंत्र पढ़कर पशुमारण) कर्म होता है, पीड़न होता है और पिंज (वध) होता है ॥ ३५ ॥

हे हरे! आपने देखा कि प्रजापति दक्ष सदृश प्रवय (वयोवृद्ध) पितर की भी मति प्रतिकूल हो गई थी। वे परिणाम की उपेक्षा कर उस पुण्यप्रद यज्ञ के प्रतिपक्षी (विरोधी) हो गये जो परमात्मा की प्राप्ति के पथ की ओर ले जाता है ॥ ३६ ॥

(संस्कृत में संयुक्ताक्षर के पूर्व का अक्षर दीर्घ माना जाता है। उस नियम के अनुसार इस श्लोक के प्रविलोक्य का क्य-दीर्घ है, छन्दोभंग कर रहा है पर पिंगलसूत्र के 'प्रह्रेवा' सूत्र के अनुसार प्र और ह्र के पूर्व वर्ण का दीर्घत्व विकल्प से होता है अतः यहां क्य ह्रस्व है)।

मैं आप के उस रूप को प्रणाम कर रहा हूं जो प्रणयार्द्र (स्नेहार्द्र) हो कर भी प्रतिघालु (कुपित) हो गया। जिसने हाथ में पृषत्क (बाण) और पिनाक धारण कर सती के पिता का बहुत सा पुण्य समाप्त कर दिया। हम तो अपने शताधिक पापों का चिन्तन कर और भी भयभीत हैं॥ ३७॥

परमेश पुरातनपूरुष पूज्यपुरोग तवापरिपक्वसुतः ।
प्रणतोऽस्ति परात्पर पामरपावनपुंगव पाहि पुनीहि पितः ॥ ३८ ॥
प्रणमाम्युपमन्युपराशरपिप्पलपंचशरप्रमथापचितम् ।
पवमानपुरन्दरपावकपाशिपरेतपतिप्रभृतिप्रणुतम् ॥ ३९ ॥
कृतिकश्यपकौशिककर्दमकोकिलकंककुबेरकणादनुतम्।
कपिलार्चितकृष्णकुमारसमादृतकैरवकान्तकुठारभृतम् ॥ ४० ॥
कमले कमलासन कोमलकांचनकुंचितकेशकपर्दधरम् ।
कलशांक नमामि किशोरकलानिधिकान्तकरैः कमनीयतरम् ॥ ४१ ॥
कलयामि करालकिरातकलेवर कृत्रिमकोपन कारणिकम् ।
कृपणार्तकिरीटिनि कृच्छ्रकृशे किरिणा क्लिशिते कृतकारुणिकम् ॥ ४२ ॥

हे परमेश्वर, पुरातन पुरुष, पूज्यों के पूज्य, परात्पर, पामरों को पवित्र करने वालों में सर्वश्रेष्ठ पिता शंकर! आप का अपरिपक्व मति वाला पुत्र चरणों में गिरा है। इसे बचा लें, इसका उद्धार करें ॥ ३८ ॥

मैं आप के उस रूप को प्रणाम कर रहा हूं जो उपमन्यु, पराशर, पिप्पल, कामदेव, प्रमथगण, वायु, इन्द्र, अग्नि, वरुण, यमराज आदि से पूजित है ॥ ३९ ॥

जो कृती (महान् पुरुष) कश्यप, विश्वामित्र, कर्दम, कोकिल, कंक, कुबेर, कणाद, कपिल, भगवान् कृष्ण, कार्तिकेय आदि से समादृत और पूजित है। जो कैरव (श्वेतकमल) सा गौर है और जिसने दुष्टों के संहारार्थ हाथ में कुठार लिया है ॥ ४० ॥

मैं आप के उस रुप को प्रणाम कर रहा हूं जिसमें आप कमलों के आसन पर पद्मासन में बैठे हैं। आप ने वह कपर्द (जटाजूट) धारण किया है जिसके केश कोमल हैं, कुंचित हैं और किंचित् पिंग (सुवर्णवत्) हैं। आप के दोनों हाथों में दो जलपूर्ण कलश हैं। आप उनसे नहा रहे हैं तथा किशोर कलानिधि (चन्द्रमा) की कान्त किरणों से और भी कमनीय (सुन्दर) हो गये हैं (यह रूप मृत्युंजय कहा जाता है) ॥ ४१ ॥

(अर्जुन पाशुपत अस्त्र की प्राप्ति के लिये इन्द्रकील पर्वत पर तपस्या कर रहे थे। दुर्योधन का भेजा मूक दानव सूकर का रूप धारण कर उन्हें मारने आया तो शंकर ने किरात का रूप धारण कर उसका वध कर दिया)।

असकृद्विफलं कृतसन्धिपणं समितौ च मुधा बहुधावमतम् ।
स्वजनैर्हृतदायपदं कुधिया विपिनेऽर्जुनमीशवराय गतम् ॥ ४३ ॥
अपि जिष्णुसहिष्णुमरातिहितं फलकाममपीन्द्रियकामजितम् ।
मघवाच्युतशंभुशिवादयितं विजने च समाधिरतं विनतम् ॥ ४४ ॥
विनिहन्तुमनाः प्रमनाः कुगिरा गिरिकम्पकरोऽभिययौ पुरतः ।
घननीलमहीधरभीमवपुर्जडदानवमूक उपाधिरतः ॥ ४५ ॥
स्मरसूदनरीत्यनभिज्ञममुं नियमस्थकपिध्वजघातपरम् ।
अविनीतकुयोधनवैतनिकं खणं पृथुसूकररूपधरम् ॥ ४६ ॥
कृपया परया विवशस्तरसा निशितेन शरेण जघान हरः ।
शरखिन्नतनुः पतितो धरणौ पिशुनः स मृतोऽस्रमुखो मुखरः ॥ ४७ ॥

मैं आप के उस रूप का आकलन करता हूं जिसने कराल किरात का शरीर धारण किया था और कृत्रिम कोप किया था। जो कारणिक (परीक्षक) था। कृच्छ्र (तप) से कृश, किरि (सूकर) से पीडित एवं कृपणार्त (चिन्तित) किरीटी (अर्जुन) पर कृत (पर्याप्त) कारुणिक (दयावान्) था ॥ ४२ ॥ पाण्डव बार-बार संधि का प्रस्ताव रख कर भी विफल थे। सभा के बीच उनका बार-बार निष्कारण अपमान किया गया था। स्वजनों ने दुर्मति से उनके दायभाग का अपहरण कर लिया था। इसलिये अर्जुन शिव की कृपा प्राप्त करने के लिये सब कुछ छोड़ कर वन में चले गये थे ॥ ४३ ॥ वे विजयी होने पर भी अराति (शत्रु) के हितचिन्तक थे, फल की इच्छा रहते हुये भी जितेन्द्रिय थे, इन्द्र विष्णु शिव और शिवा के प्रिय थे, विनीत थे। वे वन में एकान्त में समाधिनिष्ठ हो गये ॥ ४४ ॥ मेघ और पर्वत की भांति काला और भीम मूक दानव प्रमना (प्रसन्न मन) होकर अर्जुन के घात की इच्छा से सामने आया और उपाधिरत हो गया। वह अपनी भीषण गर्जना से पर्वत को कंपा रहा था ॥ ४५ ॥

वह कामेश्वर महादेव की रीति से अपरिचित था और समाधि में स्थित अर्जुन को ही मारना चाहता था। वह अविनीत दुर्योधन का दास था और विशाल सूकर का रुप धारण कर भीषण नाद कर रहा था ॥ ४६ ॥

अतिशय दया से विवश होकर हर ने तरसा (वेग से) उसको निशित (तीक्ष्ण) बाण से मार दिया। मुखर (चिल्लाता हुआ) और मुख से अस्र (रक्त) का वमन करता हुआ वह पिशुन (कपटी) बाण से पीड़ित होकर धरती पर गिर

शरणागतवत्सलमीशमिमं हृदि कारुणिकं बहिरुग्रतरम् ।
त्रिपुरान्तकलुब्धकभीममपि प्रणयेन हलाहलपानपरम् ॥ ४८ ॥
अवलोक्य पृथातनयव्यसनं त्वरयांसनिषंगपिनाकधरम् ।
प्रणमाम्यरुणाक्षमधीरतरं कुपितं शिवमंकुशशूलकरम् ॥ ४९ ॥
शिखिबर्हपरिष्कृतपिंगकचं कुसुमौघलतान्तनिबद्धजटम् ।
मलयाचलचन्दनलिप्ततनुं कृमिरोमजबादरजादिपटम् ॥ ५० ॥
निजपाशुपतास्त्रद पार्थपते नम ईश वृषध्वज धूर्जटये ।
द्विरदान्धकतारकमारक हे वृषयान नमोऽस्तु वृषाकपये ॥ ५१ ॥
विगुणाय नमः सगुणाय नमस्त्रिगुणाय हराय नमो हरये ।
जय खण्डपरश्वज तत्पुरुष प्रमथेश नमो विविधाकृतये ॥ ५२ ॥
क्वचिदुत्सवमिच्छसि नाट्यगुरो गिरिमूजवतो हिमवच्छिखरे ।
त्रिजगज्जननीमुपवेश्य शिवां मणिरत्नविभूषितपीठवरे ॥ ५३ ॥

पड़ा ॥ ४७ ॥ हमारा उन शरणागतवत्सल ईश्वर को प्रणाम है जो बाहर से अति उग्र होकर भी हृदय से कारुणिक हैं। वे त्रिपुरारि हैं, लुब्धक (व्याध) रूप धारी हैं, भीम हैं तो भी सदय होने के कारण हलाहल पी जाते हैं ॥ ४८ ॥ मेरा उन शंकर को बार-बार प्रणाम है जिन्होंने भक्त अर्जुन का संकट देख कर कंधे पर झट निषंग (तरकस) और पिनाक धारण कर लिया, जो अधीर हो गये, जिनके नेत्र कोप से लाल हो गये तथा जिन्होंने हाथों में अंकुश और शूल ले लिया ॥ ४९ ॥ जिन्होंने अपने पिंगल केशों को शिखिबर्ह (मयूरपंख) से सजाया है, जटा को अनेक कुसुमों और लतान्त से बांधा है, रेशम ऊनी और बादर (कपास) आदि के वस्त्र पहने हैं तथा शरीर में सुगन्धित मलय चन्दन लगया है ॥ ५० ॥ अर्जुन को अपना पाशुपत अस्त्र देने वाले पार्थेश! आप वृषध्वज, धूर्जटी, वृषवाहन, वृषाकपि तथा गज, अन्धक और तारकासुर आदि के मारक को नमस्कार है ॥ ५१ ॥

आप निर्गुण, सगुण और त्रिगुण हर एवं हरि को प्रणाम है। विविध आकार धारण करने वाले आप खण्डपरशु, तत्पुरुष, अज और प्रमथेश को प्रणाम है ॥ ५२ ॥ हे प्रभो! हिमाचल के उच्च शिखर पर स्थित मूजवान् आप को बहुत प्रिय है। आप वहां कभी-कभी तीनों लोकों की माता शिवा को मणियों और रत्नों से विभूषित सिंहासन पर बैठा कर उत्सव मनाते हैं। आप नाट्य के गुरु हैं अतः वहां नाटक कराते हैं ॥ ५३ ॥

घनवंशमृदंगसरोदततादिमनोहरसुस्वरवाद्यपरः।
द्रुतमध्यविलम्बिलयैर्डमरुध्वनिसंगतताण्डवनृत्यकरः ॥ ५४ ॥
वसुकिन्नरगुह्यकयक्षगणै रिटिनन्दिकतुण्डिकभृंगियुतः।
तुषितानिलभास्वरसिद्धवरैर्गतपापनरैरमरैः प्रणुतः ॥ ५५ ॥
असि च क्वचिदीश वृतो हरिणैर्मृगराजशृगालबिडालवृकैः।
अहिमूषककीरमयूरबकैः शशधेनुगजैर्वृषहंसपिकैः ॥ ५६ ॥
इति वीक्ष्य मया विदितं नितरां प्रियता विरीतनिसर्गवताम्।
तवसंगजसत्त्वगुणोदयतः सहवास इहास्ति मिथो द्विषताम् ॥ ५७ ॥
किमिहास्ति रहस्यमहं न तवस्थितिमीश्वर वेद्मि न गूढगतिम्।
अतिसूक्ष्मविशालतमस्य विभो करवाणि कथं भवतोऽपचितिम् ॥ ५८ ॥

कैलास शैलशिखरे त्रिजगज्जनित्रीं गौरीं निवेश्य
मणिकांचनरत्नपीठे। नृत्यं विधातुमभिवांछति शूल—
पाणिर्देवाः प्रदोषसमये तमनुव्रजन्ति ॥

करताल घण्टा आदि घनवाद्य हैं, बांसुरी शहनाई आदि वंशवाद्य हैं और सरोद वीणा सितार सारंगी आदि तत या तन्तुवाद्य है। आप के यहां ये तीनों और मृदंग आदि वाद्य मनोहर सुस्वर स्वरों एवं द्रुत, मध्य, विलम्बित तीनों लयों में बजते हैं और डमरुध्वनि से संगत ताण्डव नृत्य होता है ॥ ५४ ॥ उस समय वसु किन्नर गुह्यक यक्ष तुषित अनिल भास्वर आदि देवगण, रिटि नन्दिक तुण्डिक भृंगी आदि आप के गण, अनेक सिद्ध साध्य और निष्पाप नर आप को घेर कर स्तोत्रपाठ करने लगते हैं ॥ ५५ ॥

आप हरिण सिंह सियार बिडाल भेड़िया सांप मूषक शुक मयूर खरगोश गाय गज वृष हंस कोकिल आदि से भी घिर जाते हैं ॥ ५६ ॥ इनमें से अनेक का स्वभाव एक दूसरे के विपरीत है पर यहां सहवास है और आपस में अतिशय प्रीति है। हे प्रभो! मैं जान गया कि शत्रुओं की इस मित्रता का हेतु आप के संग से उत्पन्न सत्त्व गुण का उदय है ॥ ५७ ॥

हे नाथ! इसके रहस्य को, आप की स्थिति और गति को वस्तुतः मैं नहीं जानता। आप कहीं अतिसूक्ष्म हैं तो कहीं अति विशाल हैं तो मैं पूजा कैसे करुं ॥ ५८ ॥

चरकादय औषधयोगविदो बुधवाग्भटसुश्रुतवद्भिषजः।
रचितं भवताद्भुतदेहमिमं न विदुर्न च सम्यगशेषरुजः॥ ५९ ॥
शुकनारदसूतमुखा मुनयः कपिलात्रिकणादपतंजलयः।
रचनां न विदुर्ग्रहदैवविदो भृगुगर्गपराशरजैमिनयः॥ ६० ॥
अतिमन्दमतिस्तनवानि कथं तवरूपचरित्रगुणस्तवनम्।
अवतामवनं पवतां पवनं शिवनाम गृणामि मुदो भवनम्॥ ६१ ॥
भवतार्पितकान्तिसुगन्धगुणैर्युतपुष्पवनौषधिवृक्षलताः।
पशुपक्ष्युरगान् जलजान् रुचिराम्ररदेवगणान् पुरुषान् वनिताः॥ ६२ ॥
जलवायुनभस्तडिदिन्द्रधनुर्घनशैलमरूर्वरभूसरितः।
चकितोऽस्मि विलोक्य समुद्रततिं विपिनानि फलान्नचयं परितः॥ ६३ ॥

चरकादि मुनि वैद्य, योगी और शास्त्रज्ञ, तीनों थे। सुश्रुत वाग्भट आदि विद्वानों और वैद्यों की भी यही स्थिति थी पर वे आप द्वारा रचित इस अद्भुत शरीर को और सारे रोगों के रहस्य को सम्यक् (भली भांति) नहीं जान सके॥ ५९ ॥

शुक नारद व्यास सूत कपिल अत्रि कणाद पतंजलि आदि महामुनि तथा भृगु गर्ग पराशर जैमिनि आदि ग्रहवेत्ता और भाग्यवेत्ता भी आप के रचित विश्व और उसमें स्थित ग्रहादिकों का पूर्ण रहस्य नहीं जान सके॥ ६० ॥

तो फिर मैं अति मन्दमति आप के रूप, चरित्र और गुणों का विस्तृत वर्णन एवं स्तोत्रपाठ कैसे करूं। बस, आप के उस शिव नाम का केवल जप करता हूं जिसका प्रभाव मैंने योगियों में देखा है। वह रक्षकों का रक्षक है, पावनों को भी पवित्र करता है और प्रमोद का भवन है॥ ६१ ॥

मैं आप द्वारा रचित और अर्पित अनेक वस्तुओं को देख कर चकित हो जाता हूं। इन्हें आप के अतिरिक्त दूसरा नहीं बना सकता। ये हैं अनेक जड़ चेतन वस्तुओं की कान्ति, प्रभा, इन्द्रियों के आश्चर्य.जनक गुण, मानस की अपार शक्ति, विभिन्न सुगन्धों और गुणों से युत पुष्प, औषधियां, लतायें, नाना प्रकार के वृक्ष, सुन्दर पशु पक्षी सांप, जल में रहने वाले विचित्र जीव, नर नारी की विचित्र देह-रचना अनेक सूक्ष्म देव॥ ६२ ॥

जल, वायु, आकाश, बिजली, इन्द्रधनुष मेघ, पर्वत, मरुभूमि, उर्वरा, भूमि, नदियां, विस्तृत सागर, विशाल वन, नाना प्रकार के फल और अन्न आदि॥ ६३ ॥

न हि सन्ति तवोज्वलदीप्तिसमा दिवि सूर्यसहस्रभवा अपि भाः।
न तु चर्मदृशास्ति न दिव्यदृशा नरशक्तिरवेक्षितुमिद्धविभाः ॥ ६४ ॥
तपनादिखगारुणधूमशिखाः स्ववहा ध्रुवसप्तमहर्षिगणाः।
मृगलुब्धककुंभजविष्णुपदीबहुपुच्छलदास्रमुखा भगणाः ॥ ६५ ॥
नियमेन निजाध्वनि खे क्रमशो विचरन्ति कदापि न यन्ति रणम्।
परियन्ति वसन्तशरच्छिशिरा रजनीदिवसौ कुरुतो भ्रमणम् ॥ ६६ ॥
सचराचरविश्वनियामक हे हरिकेश न ते स्मरणं सुकरम्।
मनसा मनुतेऽणुतमो न भवानत ईश भजे शिवरुद्रनरम् ॥ ६७ ॥
असि शंकर जातु भयंकरवद् द्विविधोऽपि ममास्यविता सविता।
कुपितोऽप्यपराधपरे तनये मनसास्ति हितावह एव पिता ॥ ६८ ॥

हे प्रभो! प्रत्येक तारा हमारे सूर्य से लाखों गुना बड़ा और प्रकाशवान् है तथा आकाश में तारे अगणित हैं अतः निश्चित है कि आकाश में सहस्रों सूर्यों से उत्पन्न भायें (प्रकाश) आप की दीप्ति के एक अंश के समान नहीं हो सकतीं। मानव में उन्हें देखने की शक्ति नहीं है। वह उन्हें न तो चर्मचक्षु से देख सकता है, न दिव्य दृष्टि से ॥ ६४ ॥

आश्चर्य है, तपन (सूर्य) आदि ग्रह, अरुण मण्डल, अनेक धूमकेतु, स्वयंवह आवह आदि वायु, ध्रुव, सप्तर्षि, मृगव्याध, अगस्त्य, आकाशगंगा, अनेक पुच्छल तारे और दास्र (अश्विनी) आदि नक्षत्रों के समूह ॥ ६५ ॥ प्रतिक्षण नियम से आकाश में अपने मार्ग में घूम रहे हैं पर कभी युद्ध नहीं करते, आपस में टकराते नहीं। वसन्त, शरद्, शिशिर आदि ऋतुयें तथा दिन और रात नियम पूर्वक आते रहते हैं ॥ ६६ ॥ हे प्रभो! हरि (दिशायें) ही आप के केश हैं, आप दिगम्बर हैं और विश्व के सब चरों अचरों के सूक्ष्म नियामक हैं अतः आप का स्मरण मेरे लिये सुकर नहीं है। आप अणुतम (अति सूक्ष्म) हैं, मन की पकड़ में नहीं आते। इसलिये मैं आप के नरदेह धारी दो रूपों का स्मरण करता हूं। एकशिव है, सौम्य है, मांगलिक है, सुन्दर है और दूसरा वह रुद्र है जिसे आप मूक आदि दानवों के वध के समय धारण करते हैं ॥ ६७ ॥

हे शंकर! आप कभी-कभी भयंकर हो जाते हैं किन्तु दोनों स्थितियों में हमारे अविता (रक्षक) और सविता (उत्पादक, पिता) हैं। अपराधी तनय पर कुपित होने की स्थिति में भी पिता मन से हितचिन्तक ही रहता है ॥ ६८ ॥

सयमे नियमे निरता विरता बहवो यतयो हृदयाब्जशयम् ।
गुणरूपविहीनमणुं मनसा प्रजपन्त्यपवर्गदमृत्युजयम् ॥ ६९ ॥
सुरलोकफलप्रदयज्ञपरा हविषाभ्युदयाय यजन्ति च यम् ।
अतिसात्त्विकरूपशिवं गृहिणं सुकृतेन निजेन यजे तमहम् ॥ ७० ॥
मनसो वचसो वपुषोऽघरुजां शमनं प्रणमामि महाभिषजम् ।
अखिलेशमपि द्विभुजं मनुजं जनपुष्टिविवर्धनमीशमजम् ॥ ७१ ॥
रघुनाथपदाम्बुजपादुकयोर्विनिवेद्य समं सरलो भरतः ।
व्यथितो नयतोऽखिलराज्यभरं समुवाह कृती प्रतिमानरतः ॥ ७२ ॥
अगदीदनयोर्बलतो भविता नगरीबलराष्ट्रसुहृत्कुशलम् ।
मनुते स्म तथापि भृशं विफलं प्रभुरामविहीनमिदं सकलम् ॥ ७३ ॥
अशने वसने मुनिरामसमो नृपराममना अजपत् प्रयतः ।
द्रुतमेहि दयाघन राम परात्पर राम विहाय कुतोऽसि गतः ॥ ७४ ॥

यम, नियम आदि योग के अंगों में निरत अनेक विरक्त यति अपवर्ग (मोक्ष) की अभिलाषा से मन से उन ईश्वर को जपते हैं, जो हृदय कमल में स्थित हैं, गुण और रूप से हीन हैं, सूक्ष्म हैं और मृत्युंजय हैं ॥ ६९ ॥

इस लोक में अभ्युदय और मरने पर स्वर्गसुख पाने के लिये याजक गण आप की पूजा आहुतियों से करते हैं, पर मैं आप के अति सात्त्विक गृहस्थ रूपधारी साम्बशिव की पूजा अपने सुकर्मों से करता हूं ॥ ७० ॥ हे नाथ! आप मन, वचन और शरीर के पापों तथा रोगों का शमन करने वाले वैद्यनाथ हैं। मैं आप के उस रूप को प्रणाम कर रहा हूं जो अखिलेश (विश्वनाथ) और अज हो कर भी दो भुजाओं वाला मानव है और अपने भक्तों की हर प्रकार की पुष्टि का संवर्धन करता है ॥ ७१ ॥ सरल और कृती (कुशल) भरत ने पूरे राज्य का भार श्रीराम के पदपद्म की पादुकाओं को समर्पित कर दिया। उन्हें राजसिंहासन पर रख दिया और वे हृदय से व्यथित होते हुये भी खड़ावूं में रत होकर नय (न्याय) पूर्वक राज्य भार संभालते रहे ॥ ७२ ॥ उन्होंने सबसे कह दिया कि इस प्रतिमान के बल से मेरी नगरी, सेना, राष्ट्र और मित्रों का सदा कल्याण होगा किन्तु प्रभु राम के अभाव में उन्हें सब कुछ अति निष्फल प्रतीत हो रहा था ॥ ७३ ॥

उनका भोजन और वस्त्र वनवासी मुनि राम के समान था पर मन राजाराम को जपा करता था और वे अति संयमित थे। दिन रात यह रटा करते थे कि हे

द्रवितः स ससीत उदारमना भगवान् कृतवान् करुणां भरते ।
मयि सोम तथैव कुरुष्व दयां विगुणेऽप्यनिशं तव पादरते ॥ ७५ ॥
सवितः समुदेहि मनोगगने मलिने तमसा रजसा महता ।
कुरु नाथ तथैव यथा भवता विहितं त्रिपुरं मदनं दहता ॥ ७६ ॥
अनुभूतमिदं शकुनग्रहभादिफलेषु भये न ममास्ति हितम् ।
मतिदुर्बलतावगताऽत्र मया जनतारक तारय पादनतम् ॥ ७७ ॥
स्थितमीश नमामि पुनर्निखिले खगदिग्भचये च पदे समये ।
उदिते क्वचिदेव ममास्तु रतिर्विषपानपरे त्रिजगन्निलये ॥ ७८ ॥

दयाघन परात्पर राम! शीघ्र आयें। आप मुझे छोड़ क्यों और कहां चले गये ॥ ७४ ॥ उदारचित्त राम भरत की इस हार्दिक प्रार्थना को जान द्रवित हो गये और एक क्षण का विलम्ब किये विना ठीक समय पर सीता के साथ अयोध्या आ गये। हे उमाशंकर! मैं गुणविहीन होने पर भी मन से आप के चरणों में रत हूं। मुझ पर राम की ही भांति कृपा कर दें ॥ ७५ ॥ हे सवितृ देव! मेरा मनोगगन सचमुच महान् तम और रज से मलिन है। कृपया उसमें स्थित आप उदित हो जायं। हे नाथ! आप इन दोनो को उसी प्रकार जला दें जैसे त्रिपुर और मदन को जलाया था ॥ ७६ ॥ हे प्रभो! मुझे इसका अनुभव प्राप्त हो गया है कि अनेक शकुनों, ग्रहों, नक्षत्रों, तिथियों आदि के फलों में जो भय बताये गये हैं वे काल्पनिक हैं और उन्हें मानने में हमारा हित नहीं है। भद्रा भरणी आदि अशुभ होते तो वेद में उनके शुभ नाम नहीं रखे जाते। मैंने जान लिया है कि यह भय हमारे मन की दुर्बलता है अतः हे तारकेश्वर! हमें इस सागर से पार कर दें। हम आप के चरणों में नत हैं ॥ ७७ ॥ हे ईश! मैं पुनः सारे ग्रहों, नक्षत्रों, दिशाओं, स्थानों और समयों में स्थित आप को प्रणाम कर रहा हूं। हां, आप कुछ ही स्थानों में उदित हैं। मेरी रति उन्हीं विश्वनाथ में हो जो भक्तों के संकटरूपी विष को पीते हैं ॥ ७८ ॥

पञ्चमोऽध्यायः

परा (श्रेष्ठ) पूजा

बुधा आहुरीशानुकम्पां च शान्तिं यथाप्नोति ना ज्ञानशस्तक्रियाद्यैः ।
तथा नो मुहूर्तादिभिर्नैव तीर्थैर्न च स्नानपूजोपवासाध्वराद्यैः ॥ १ ॥
नृदेहे स्थिताः सन्ति पुर्यः सुराद्या अमीषां ततोऽन्वेषणात्रैव युक्ता ।
न युक्तार्थनार्चेश्वराणां बहूनां न चान्नोदकत्यागशिक्षोपयुक्ता ॥ २ ॥
विहायान्ननीरे हरिं भूतसंघं तनुस्थं मुधा ये हठात् पीडयन्ति ।
बुधास्तानहंकारपाखण्डयुक्तान् जडानासुरान् बालिशांश्च ब्रुवन्ति ॥ ३ ॥

बुधों का कथन है कि ना (मानव) ज्ञान एवं सत्कर्म आदि से जितनी शान्ति और ईश्वरकृपा पा लेता है उतनी मुहूर्त, लग्न, तीर्थयात्रा, स्नान, पूजा, उपवास और यज्ञ आदि से नहीं पाता ॥ १ ॥ सारी पुरियां, देव, और ग्रह आदि हमारे शरीर में स्थित हैं अतः इनका अन्वेषण इसी में योगमार्ग से करना चाहिये। हमें न तो अन्न जल के त्याग से ईश्वर प्राप्ति की शिक्षा देनी चाहिये, न अनेक ईश्वर मान कर उनकी अति प्रार्थना और पुष्पादि से पूजा करनी चाहिये। हमारे यहां कोई शिव को, कोई विष्णु को, कोई राम को और कोई कृष्ण, गणेश, दुर्गा आदि को ईश्वर एवं शेष को उनका पुत्र, दास आदि कहता है। अनेक देवों से दिन भर कुछ न कुछ मांगता रहता है और उनकी प्रशंसा करता है। वेदों में यह प्रार्थना है कि हे शिव, हे देवो! हमें यव, गेहूं, तिल, मूंग आदि अन्न, सुख, गौ, अश्व, सुदिन, पुत्र, विजय, शत्रुनाश आदि दें। शिव, राम, दुर्गा, हनुमान् आदि के कवचों में लम्बी प्रार्थना है कि हमारे नाक, कान, दांत, सिर, बाहु, उदर जांघ, मांस, चर्म, अस्थि, गोत्र, पशु आदि की रक्षा करें और हमें सुन्दर रूप, मनोरमा पत्नी, आज्ञाकारिणी भार्या, अनेक पुत्र, यश, धन, विजय आदि दें। वस्तुतः इतनी लम्बी याचना उपयुक्त नहीं है ॥ २ ॥

तदेव लग्नं सुदिनं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ।
क्रियते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ॥
ज्ञानविहीनं सर्वमनेन मुक्तिर्न भवति जन्मशतेन ।

कुतृट्चौर्यहिंसाव्यवायानृतानां परित्याग उक्तो यमो योगविज्ञैः ।
प्रयुक्ता यमाः सर्वदा सर्वदेशे निरुक्ता महान्ति व्रतान्यागमज्ञैः ४ ॥

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा । ज्ञानसम्प्राप्ति–
समये मुक्तोऽसौ विगताशयः (आदिशंकराचार्य) ॥
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ।
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥
नात्यश्नतस्तु योगोस्ति न चैकान्तमनश्नतः (गीता) ॥

योगीश्वरों का कथन है कि जिन भक्तों की श्रद्धा मूढ़तापूर्ण पकड़ से दूषित है, जो अन्नजल का परित्याग कर व्रत और उपवास के नाम पर शरीर में स्थित पृथ्वी जल आदि पांच महाभूतों को तथा हरि को पीड़ित करते हैं वे बुद्धिहीन हैं, अहंकारी और पाखण्डी हैं और निश्चित रूप से आसुर हृदय वाले मन्द हैं ॥ ३ ॥

युक्तहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ६।१७ ॥
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।
दंभाहंकारसंयुक्ताः कामरागबलान्विताः १७।५ ॥
कर्षयन्तः शरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान् १७।६ ॥
मूढग्राहेणात्मनो यत्पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् १७।१९ (गीता)॥
एकभुक्तोपवासाद्यैर्नियमैः कायशोषणैः ।
मूढा विमुक्तिमिच्छन्ति हरिमायाविमोहिताः ॥
देहदण्डनमात्रेण का मुक्तिरविवेकिनाम् ।
वल्मीकताडनादेव मृतः कुत्र महोरगः (गरुडपुराण) ॥
अन्नं प्राणस्तथापानं मृत्युर्जीवितमेव च ।
अन्नं ब्रह्म च विज्ञेयं (वायुपुराण १५।११) ॥
अन्नं पुष्टिकरं तत्र ममाप्यव्याहतं सुखम् ।
अन्नं बलाय मे भूमेः (विष्णुपुराण ११।९१) ॥

विहायान्ननीरे हृदा ते स्मरन्तः प्रकुर्वन्त्यतोऽमी व्रतस्योपहासम् ।
तदेवोपवासं विदन्तश्च मोहान्न कुर्वन्ति देवेशसाधूपवासम् ॥ ५ ॥
इमे मन्वते साधनान्येव साध्यान् जटाद्यैरनायासमिच्छन्ति सिद्धिम् ।
मनःक्लिष्टवृत्तेर्निरोधाद्विरागान्न चाभ्यासतः कुर्वते हृद्विशुद्धिम् ॥ ६ ॥
क्वचिद्दण्डकौपीनमात्रेण बोधं विना सन्ति नारायणास्ते विजाताः ।
जरद्देहवन्तोऽप्यमुंचन्न कोपं न लोभं न हर्म्यादि सन्तोऽभिजाताः ॥ ७ ॥

योगशास्त्र के अभिज्ञों ने कुतृष्णा, चोरी, हिंसा, अशास्त्रीय संभोग और असत्य के परित्याग को यम कहा है। आगम और योगशास्त्र के विशेषज्ञों का कथन है कि इन यमों का हर जाति, हर देश, प्रत्येक काल और प्रत्येक समय (अवसर) में पालन करने पर ये महाव्रत हो जाते हैं। सारांश यह कि यम ही व्रत हैं ॥ ४ ॥

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः २।३० ॥
जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् २।३१ ॥ पातजल योगशास्त्र

ये अन्न और जल तो छोड़ देते हैं पर हृदय से उन दोनों का स्मरण करते रहते हैं। यह व्रत का उपहास है। मोहवश इसी व्रत को उपवास भी मानते हैं और यह भूल जाते हैं कि उपवास है देवों के,परमात्मा के और साधुओं के उप (समीप) में वास करना। गीता में कृष्ण भगवान् का कथन है कि जो मनुष्य कर्मेन्द्रियों को संयमित कर मन से विषयों का स्मरण करता रहता है वह मिथ्याचारी है ॥ ५ ॥

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥

हे प्रभो! ये लोग साधनों को ही साध्य मान रहे हैं। जटा, माला, स्नान आदि से प्रयास के विना सिद्धियां प्राप्त करना चाहते हैं। मन की क्लिष्ट (दूषित) वृत्तियों के निरोध से, विराग से, अभ्यास से अपने हृदय को विशुद्ध नहीं करते। ये अपने को जाने विना ईश्वर को पाना चाहते हैं ॥ ६ ॥

योगश्चित्तवृत्तिनिरोधः । वृत्तयः क्लिष्टाक्लिष्टाः । अभ्यास-
वैराग्याभ्यां तन्निरोधः । तदा द्रष्टुः स्वरूपेऽवस्थानं (योगशास्त्र) ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते (गीता) ।

हमारे यहां कुछ संन्यासी बोध प्राप्त किये बिना, मन को रंगे विना, मन शरीर और वाणी को दण्डित किये विना केवल दण्ड और कौपीन के धारण मात्र से

विरागाच्चिराभ्यासतो यं लभन्ते यतीशाः कदाचित् प्रभुं तत्प्रकाशम् ।
सकृन्नामभी रामनारायणादेस्तमाप्याशु कुर्वन्ति तेऽघाद्रिनाशम् ॥ ८ ॥
उषित्वा चिरं दैवविद्वृन्दपादे मठे मन्दिरे नैकतीर्थे भ्रमित्वा ।
हताशोऽधुनात्रागतोऽहं पदे ते प्रभो त्वां मृडं चाशुतोषं विदित्वा ॥ ९ ॥
विलोक्य प्रभूतानबोधेन निघ्नान् स्मयेन प्रभून् मत्सरेणाप्तविद्यान् ।
निराशोऽस्मि विद्वद्वरांस्तीक्ष्णबुद्धीनवेक्ष्याधुना दुष्प्रथासिन्धुमग्नान् ॥ १० ॥
यतीशेज्यकृष्णस्य रामस्य शिक्षाः शुभाः सन्ति मग्नाः कथाब्धावपारे ।
विलुप्ता मनुव्यासवाल्मीकिवाचः सुगाथाश्च शंभोः कुकाव्यान्धकारे ॥ ११ ॥

नारायण हो गये हैं। हमारे अभिजात (मान्य) सन्तों और संन्यासियों ने शरीर के जर्जर हो जाने पर भी अभी क्रोध, लोभ और भव्य भवनों का त्याग नहीं किया है ॥ ७ ॥

दण्डग्रहणमात्रेण नरो नारायणो भवेत् ।

विषयों में विराग से और यमों नियमों के चिरकालीन अभ्यास से बड़े बड़े योगीश्वर जिन प्रभु को और उनके दिये प्रकाश को कभी कभी पाते हैं उन दोनों को यहां श्रद्धा के विना सकृत् (केवल एक बार) राम, नारायण आदि कह देने पर लोग अघों के सागर को सुखा देते हैं ॥ ८ ॥

हे प्रभो! मैं ऐसे लोगों के और अनेक ज्योतिषियों के चरणों में तथा अनेक मठों, मन्दिरों और तीर्थों में भ्रमण करने के बाद हताश हो कर अब आप के चरणों में यह जानकर आया हूं कि आप मृड (सुखद) और आशुतोष हैं ॥ ९ ॥

मैं ने देखा कि अनेक लोग अबोध से, धनी अहंकार से और विद्वान ईर्ष्या से आहत हैं। मैं यह देख कर हताश हूं कि अनेक मेधावी विद्वान् इस समय कुरूढ़ियों के सागर में डूब रहे हैं ॥ १० ॥

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः । अबोधोप-
हताश्चान्ये जीर्णमंगे सुभाषितम् (योगिराज भर्तृहरि) ॥

यतीशों के पूज्य भगवान् राम और कृष्ण की शुभ शिक्षायें अपार कथासागर में डूब गई है, मनु व्यास वाल्मीकि आदि की वास्तव वाणियों का बहुत बड़ा भाग लुप्त हो गया है, उनमें अनेक प्रक्षेप आ गये हैं और आप की सुगाथायें कुकाव्य के अन्धकार में अदृश्य हो गई हैं ॥ ११ ॥

शिवो याति नग्नो विवाहे पिशाचैः समं भीमरावैः शरीरैर्विशालैः ।
गणैः शोणितार्द्रैश्च तुण्डे समानैः खरैः सूकरैः कुक्कुराद्यैः शृगालैः ॥ १२ ॥
समालोक्य सेनां वरं बालवृद्धा विभीता रुदत्यो रमण्यः प्रणष्टाः ।
ददुर्लिंगपातस्य शापं च पश्चान्महेशाय विप्रा अभीकाय रुष्टाः ॥ १३ ॥
सभास्थस्य शंभोः शिरस्यस्ति गंगा नदी स्त्री च वामांकगास्त्यद्रिकन्या ।
स दृष्ट्वा हरिं मोहिनीं कीशतातो बभूवांजना तेन पुत्रेण धन्या ॥ १४ ॥

आज की शिवकथा में आप अपने विवाह के दिन ससुराल में उन पिशाचों और गणों के साथ जाते हैं जिनके उच्च शब्द भीषण हैं, शरीर विशाल हैं, मुख गधे सूअर कुत्ते सियार आदि के समान हैं, किसी को मुख है ही नहीं, किसी को अनेक मुख हैं और सबके शरीर ताज़े रक्त से लथपथ हैं। ॥ १२ ॥

खरश्वान सुअर शृगालमुख सब सद्य शोणित तन भरे ।
कोउ मुखहीन विपुल मुख काहू । नगन जटिल भयंकरा ।

लिखा है कि वर और बारात की भीषणता देख कर बाल वृद्ध युवक अतिशय भयभीत होकर भागे और रोती हुई नारियां भी घरों में छिप गईं। विवाह के बाद आप ने ऐसा घृणित कर्म किया किं रुष्ट सप्तर्षियों ने क़ामी आप के लिंगपात का शाप दे दिया। अब्र उसी की पूजा होती है जब कि पुराणों में लिखा है कि हिमाचल पुरी के नर नारी प्रसन्न होकर कहने लगे कि हमने ऐसा सुन्दर वर न सुना है न देखा है। आज हम सब धन्य हो गये हैं और हमारा जन्म सार्थक हो गया है। (देखिये मेरा उमोद्वाहमहाकाव्य) ॥ १३ ॥

न श्रुतो वर इत्येवं नास्माकं दृष्टिगोचरः ।
वयं धन्याः स्त्रियः सर्वाः पुरुषाः सकला अपि ।
ये ये पश्यन्त्यदो रूपं तेषां वै सार्थक जनुः ॥

सभा में बैठे मानव शिव के सिर पर एक पत्नी गंगा बैठी है। वह नारी है और नदी भी। गोद में बाईं ओर वे पार्वती बैठी हैं जो मानवी होकर भी पर्वत की कन्या हैं। समुद्रमंथन के समय हरि ने मोहिनी नारी बन कर दैत्यों को छला था। आप ने उसे देखा तो वीर्यपात हो गया और वह बहुत दिनों बाद अंजना के कान में डाला गया तो उससे वानर हनुमान् पैदा हो गया। जबकि न तो उसके पिता आप वानर थे न उसकी माता अंजना वानरी थी ॥ १४ ॥

कथावाचका दैवविज्ञाः प्रथान्धा भृशं कुर्वते भुक्तये वाग्विलासम् ।
उपेक्ष्यार्यविज्ञानयोगानुभूतिं जगच्छंकरं सत्यशोधप्रयासम् ॥ १५ ॥
भ्रमन्तः स्वयं भ्रामयन्ति प्रथायां पुरा कल्पितं विद्यते पुस्तके यत् ।
शिवं चाशिवं संभवासंभवं वा शुभं वर्तते सर्वमेषां मते तत् ॥ १६ ॥
व्रतस्योपहासं प्रकुर्वन्ति हित्वा यमान् संयमादींश्च कृत्वोपवासम् ।
अहिंसार्जवास्तेयतुष्टिक्षमाभिर्विधातुः सतां कुर्वते नोपवासम् ॥ १७ ॥
जटाभस्ममालोर्ध्वपुण्ड्रैश्च दण्डैरनायसमिच्छन्ति सिद्धिं प्रसिद्धिम् ।
न वांछन्ति वैराग्यतो ऽभ्यासतस्ते कुवृत्तिक्षयं चित्तशुद्धिं सुबुद्धिम् ॥ १८ ॥
अबोधेऽपि संन्यासतीर्थे प्रशंसन् परं तीर्थमुज्झित्य लोकोपकारम् ।
प्रतन्वन्ति तेनैव सृष्टैः पदार्थैर्विधेर्विश्वनाथस्य पूजोपचारम् ॥ १९ ॥

इन कथाओं के वे रूढ़िवादी लेखक वाचक और ज्योतिषी लौकिक भोगों की प्राप्ति के लिये लम्बा वाग्विलास करते हैं। उन्होंने संसार के कल्याणकारी श्रेष्ठविज्ञान, योगानुभव और सत्य की खोज के प्रयास की उपेक्षा कर दी है ॥ १५ ॥

वे स्वयं भ्रम में हैं और दूसरों को प्रथाओं में भरमा रहे हैं। उनकी पुरानी पुस्तकों में जो कल्पित सिद्धान्त लिख दिये गये वे शुभ हों या अशुभ हों, संभव हों या असंभव हों, इनके मत में सब ठीक हैं ॥ १६ ॥

ये अन्नजल का परित्याग कर उपवास करते हैं तथा अहिंसा, सत्य आदि यमों और धारणा ध्यान समाधि आदि संयमों का परित्याग कर व्रत का उपहास करते हैं। ऐसा नहीं करते कि अहिंसक, विनम्र, अचोर, सन्तुष्ट क्षमाशील आदि बन कर विधाता और सन्तों के उप (समीप) में वास करें॥ १७॥

ये आयास (साधना, परिश्रम) किये विना केवल जटा, भस्म, माला, ऊर्ध्वपुण्ड्र, त्रिपुण्ड, दण्ड, रंगीन वस्त्र आदि धारण कर अष्ट सिद्धि और प्रसिद्धि प्राप्त करना चाहते हैं। योगशास्त्र कहता है कि सिद्धियां चाहते हो तो वैराग्य और अभ्यास द्वारा मन की दूषित वृत्तियों का नाश करो। चित्त को शुद्ध और बुद्धि को निर्मल बनावो पर इन्हें यह श्रम अवांछित है ॥ १८ ॥

इनके मत में बोध के अभाव में भी संन्यास और तीर्थयात्रा से सब कुछ मिल जाता है। इन्होंने सबसे बड़ा तीर्थ लोकोपकार त्याग दिया है। विश्वनाथ ने जो पदार्थ बनाये हैं उनको ही देकर ये पूजा के अनेक उपचार करते हैं ॥ १९ ॥

अशास्त्रीयघोरं तपश्चाश्रितास्ते वपुष्पीडनेनैव सिद्धिं विदन्तः ।
विधायात्महिंसां प्रयागे लभन्ते न मुक्तिं शिवं देहगं कर्षयन्तः ॥ २० ॥
विना भौतिकज्ञानमध्यात्मविद्यां विना कौशलं कर्मसु ज्ञानयोगम् ।
अमी प्राप्तुमिच्छन्ति बाह्योपचारैरनायासमानन्दमीशं मनोगम् ॥ २१ ॥
मते योगिनां सन्ति पापैर्विभीता अजातारयो ये सदाचारवन्तः ।
प्रपश्यन्ति दासानपि भ्रातृदृष्ट्या त एव प्रियास्ते नरा भाग्यवन्तः ॥ २२ ॥
गुरुप्राज्ञदेवान् रतान् लोकभद्रे समर्चन्ति भक्त्या समाजप्रिया ये ।
परित्यज्य जातिस्वदेशादिभेदान् मते मे प्रियास्ते प्रभो सत्क्रियास्ते ॥ २३ ॥
पशून् पक्षिणो रोगिणश्चासहायान् नरान्निम्नवार्तान् निषादान् श्वपाकान् ।
प्रपश्यन्ति दासानपि स्नेहदृष्ट्या स्वबन्धून् विजानन्त्यधीरान् वराकान् ॥ २४ ॥
समं वारि तेषां कृते गांगमंभो गमस्तीर्थयात्रास्ति निद्रा समाधिः ।
गिरो वेदवाक्यानि वाराणसी भूर्जयो हृज्जयः क्वापि नोपाधिराधिः ॥ २५ ॥

इन्हें इस बात का भी दृढ़ विश्वास है कि अन्न जल छोड़ कर शरीर को पीड़ित करने से, सुखाने से सारी सिद्धियां मिल जाती हैं। ये स्वर्गादि उत्तम लोकों की प्राप्ति के लिये प्रयाग आदि तीर्थों में अनेक विधियों से आत्महत्या भी करते हैं। किन्तु शरीरस्थ आत्मा के पीड़क ये मुक्ति आदि नहीं पाते ॥ २० ॥

ये भौतिक ज्ञान की निन्दा करते हैं जबकि आप का नाम भूतनाथ है, आप हर भूत में बैठे हैं। ये अध्यात्मविद्या, ज्ञानयोग कर्ममें कुशलता और आयास के विना केवल बाह्य उपचारों द्वारा आनन्द और हृदयस्थ आप को पाना चाहते हैं ॥ २१ ॥ योगियों का कथन है कि जो भाग्यशाली मनुष्य पाप से डरते हैं, शत्रु से हीन हैं, सदाचारी हैं और अपने दासों में भी भ्रातृभावना रखते हैं वे ही आप के प्रिय हैं ॥ २२ ॥ हे प्रभो! मेरे मत में वे सदाचारी हैं और आप को प्रिय हैं जो समाज के प्रिय हैं, स्वजाति स्वदेश आदि के भेदभाव को भूलकर गुरुजनों, विद्वानों, देवों और लोककल्याण में लगे सज्जनों की सेवा करते हैं ॥ २३ ॥ जो पशुओं, पक्षियों, रोगियों, असहायों, निम्न वर्ण के निषादों, श्वपाकों, दासों, अधीरों और दरिद्रों को स्नेहदृष्टि से देखते हैं तथा उन्हें अपना बन्धु समझते हैं ॥ २४ ॥ उनके लिये सारे जल गंगाजल हैं, उनकी हर यात्रा तीर्थयात्रा है, निद्रा समाधि है, वाणी वेदवाक्य है, सारी धरती वाराणसी है, उनकी जितेन्द्रियता ही विजय है और उन्हें न कहीं आधि है न उपाधि है ॥ २५ ॥

जगन्नन्दनं काननं कल्पवृक्षाः समे पादपाः शर्म लाभः समेषाम् ।
धनं ज्ञानमेवाखिलं कर्म पूजा शिवोऽस्ति स्थितः सर्वभूतेषु तेषाम् ॥ २६ ॥
अमी कल्मषं ज्ञानतो भस्म कृत्वा स्वसत्कर्मभिर्विश्वनाथं भजन्तः ।
यशो मंगलं भूम्नि नाके लभन्ते त्वदीयाश्रयं सन्ततं भाग्यवन्तः ॥ २७ ॥
श्वपाकालये वा प्रयागे च काश्यां भवेद्देहदाहो नराणां मृतिर्वा ।
अभावे सदाचारविज्ञानयोस्तैः कदाप्याप्यते नो हरिः सद्गतिर्वा ॥ २८ ॥

उनके लिये सारा विश्व स्वर्ग का नन्दनवन है, सब वृक्ष कल्पवृक्ष हैं और सबका कल्याण अपना शर्म (कल्याण) है। ज्ञान ही उनका धन है, कर्म ही पूजा है और उनका शिव हर जीव में स्थित है ॥ २६ ॥

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च। सन्तुष्टः सततं
योगी यतात्मा दृढ़निश्चयः ॥ यस्मान्नोद्विजते लोको
लोकान्नोद्विजते च यः । समः शत्रौ च मित्रे च यो मद्भक्तः
स मे प्रियः ॥ विद्याविनयसम्पन्ने ब्राह्मणे
गवि हस्तिनि । शुनि चैव श्वपाके च पंडिताः समदर्शिनः (गीता)
सम्पूर्णं जगदेव नन्दनवनं सर्वेपि कल्पद्रुमाः
गांगं वारि समस्तवारिनिवहाः पुण्याः समस्ताः क्रियाः ॥
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरः
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ॥
वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी
यद्यत् कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥

ऐसे भाग्यशाली लोग ज्ञान से सारे दोषों को भस्म कर अपने सत्कर्मों द्वारा विश्वनाथ का भजन करते हुये पृथ्वी पर मंगल और यश तथा स्वर्ग में सर्वदा आप का आश्रय पाते हैं ॥ २७ ॥

मनुष्य का मरण अथवा मरने पर शरीर का दाह श्वपच के घर में हो, या प्रयाग, काशी, अयोध्या आदि पुरियों में हो, सदाचार और विज्ञान के अभाव में उसे कभी भी हरि या सद्गति की प्राप्ति नहीं होती। दण्डग्रहण मात्र से या कहीं मरने से नर नारायण या निष्पाप नहीं हो जाता ॥ २८ ॥

विमुक्तिर्जनीनां शतैराप्यते नो प्रबोधं विना भूरिदानोपवासात् ।
न गंगादिकूलंकषासूदधौ वा मुहुः स्नानतो नो च तीर्थे निवासात् ॥ २९ ॥
श्रुतं योगिनः सन्तताभ्यासशीलाः शरीरस्थचेतःपुरीचक्रशोधात् ।
लभन्ते प्रबोधं च सिद्धीः प्रभूताः प्रभो चेतसः क्लिष्टवृत्तेर्निरोधात् ॥ ३० ॥
नराणां मनःसद्बलं चास्ति मुख्यं बलेभ्यः शरीरास्त्रशस्त्रादिकानाम् ।
युता आयुधैरप्यभावेऽस्यदासा भवन्त्यल्पधीवित्तविद्यायुधानाम् ॥ ३१ ॥
अतो मानसे सद्बलं देहि शंभो निरस्तं क्रिया मेऽन्धकारं विषादम् ।
सुमार्गे नयाश्वानिवाभीषुभिस्तद् यथा प्राप्नुयां त्वां च बोधप्रसादम् ॥ ३२ ॥
पदख्यातिभोगात्मजार्थेषु मुग्धं शिवं त्वामुपेक्ष्येन्द्रियार्थे जविष्ठम् ।
कृथा हे चिदानन्द चेतो मदीयं द्रुतं सात्त्विकं साधुसंकल्पनिष्ठम् ॥ ३३ ॥

मनुष्य बहुत दान उपवास आदि करे, गंगादि पवित्र नदियों और सागरों में बार बार नहाये और बहुत दिनों तक तीर्थवास करे तो भी ज्ञान और सदाचार के अभाव में सौ जन्मों में भी मुक्ति नहीं पाता ॥ २९ ॥

तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा ।
ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताशयः ॥
क्रियते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनं सर्वमनेन मुक्तिर्न भवति जन्मशतेन (शंकराचार्य) ॥

हे प्रभो! मैं ने सुना है कि अभ्यास में सदा तत्पर योगी चित्त की कुवृत्तियों का निरोध कर शरीर में स्थित पुरियों एवं चक्रों का अन्वेषण करते हैं और तब प्रबोध एवं सिद्धियां पाते हैं ॥ ३० ॥ मनुष्यों के मन का सद्बल शरीर, अस्त्र, शस्त्र, धन, सेना आदि के बल से श्रेष्ठ है और उसके अभाव में वे आयुध आदि बलों से युत रहने पर भी अल्पबुद्धि, धन, विद्या और आयुध वालों के दास हो जाते हैं ॥ ३१ ॥ अतः हे शंभो! कृपया हमें सत् मनोबल दें और हमारे अज्ञान रूपी अन्धकार को और विषाद को दूर करें। उसे उसी प्रकार सुमार्ग में ले चले जैसे सारथी अश्वों को अभीषु (लगाम) द्वारा सुमार्ग में ले जाता है। ताकि हम आप को और प्रबोधजन्य प्रसाद (हर्ष) को पा सकें ॥ ३२ ॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वा-
जिन इव । हृत्प्रतिष्ठं यदजिरं जविष्ठं, ज्योतिषां ज्योतिः, यदपूर्वं
यक्षं, यज्ज्योतिरन्तरमृतं प्रजासु, येनेदं भूतं भुवनं भविष्यत्

तमो ज्योतिषा चामृतैः सर्वमृत्युं गुणैर्दोषसंघं कृषीष्ठा दविष्ठम् ।
खलेभ्योऽतिदूरं नयस्वेति याचे कृपासागरं त्वां शिवं हृत्प्रतिष्ठम् ॥ ३४ ॥
अजानां न सन्देहदुस्तर्कमुग्धो भविष्यं न भूतं न च त्वाऽऽशुतोषम् ।
दयालोऽनुतापत्रपार्तं सदोषं शिवैतर्हि पाह्यात्मजं मुंच रोषम् ॥ ३५ ॥
अनादेरनन्तस्य का वा स्तुतिस्ते कृतीनां गुणानाममेया ततिस्ते ।
पुनीया मतिं विस्मृतिं नैव कुर्याः शिव त्वं गतिः स्यात् पदाब्जे रतिस्ते ॥ ३६ ॥
हृषीकेश हे श्रीपते विश्वमूर्ते हरे केशवो मूर्ध्नि गंगाधरस्त्वम् ।
महादेव दामोदरस्त्वं हरस्त्वं शिवः श्रीगलः श्रीघनः श्रीधरस्त्वम् ॥ ३७ ॥

परिगृहीतं, यस्मिन् ऋचः साम यजूंषि यस्मिन् प्रतिष्ठिता
रथनाभाविवारास्तन्मे मनः शिवसंकल्पमस्तु (यजुर्वेद) ॥

हे सच्चिदानन्द! उच्चपद, ख्याति, भोग, पुत्रपौत्र और धन आदि में मुग्ध मेरा मन आप शिव की उपेक्षा कर इन्द्रियों के अनेक विषयों की ओर दौड़ रहा है। कृपया इसे शीघ्र सात्त्विक और शुभसंकल्पवान् बना दें ॥ ३३ ॥ आप मेरे तम को ज्ञानज्योति से, सब मृत्युओं को कृपामृत से और सद्गुणों से दोषसंघ को दूर कर दें तथा मुझे खलों से दूर रखें। कृपा के सागर और हृदय में स्थित आप परमात्मा से मेरी यही प्रार्थना है ॥ ३४ ॥

असतो मा सद्गमय, तमसो मा ज्योतिर्गमय,
मृत्योर्मा अमृतं गमय (उपनिषत्) ॥

हे प्रभो! सन्देह और दुस्तर्क के जाल में फंस कर न तो मैं भूत भविष्य जान सका, न आप आशुतोष को, जब कि सब मेरे मन में प्रतिष्ठित हैं। मुझे तो आप की सत्ता में ही संशय होने लगा था पर हे दयालो! अब मैं पापी पश्चात्ताप और लज्जा से दुखी हूं। कृपया रोष का परित्याग कर अपने आत्मज की रक्षा करें (येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्) ॥ ३५ ॥

आप की कृतियों और गुणों का विस्तार अपरिमित है तो मैं आप अनादि अनन्त की स्तुति कैसे करूं। बस, एक आप ही गति हैं, आप के पदाब्ज में रति बनी रहे, यही अभिलाषा है ॥ ३६ ॥ हे हृषीकेश! आप ही श्रीपति, विश्वमूर्ति, हरि, केशव, गंगाधर, महादेव, दामोदर, हर, शिव, श्रीकण्ठ, श्रीघन (बुद्ध) और श्रीधर आदि सब कुछ हैं ॥ ३७ ॥

हिरण्याक्षपौलस्त्यकंसा मुराद्या हता विष्णुना पालकेनैव पापाः ।
अतो मारकादिप्रलापस्त्वयीशे शिवे सन्ति मोहोद्भवा विप्रलापाः ॥ ३८ ॥
उमायाः पतिं नौमि मायापतिन्त्वां नमो माधव श्रीपते शक्तिधाम्ने ।
नमो विष्णवे वेधसे शंभवे ते शिवायोरुलीलाकृते नैकनाम्ने ॥ ३९ ॥
विषाध्मातदेवासुरा धूतधैर्या वनेऽपासिताः पाण्डवा गूढचर्याः ।
समुद्वेजितास्तारकाद्यैरनेके पुरारे त्वया रक्षिता भक्तवर्याः ॥ ४० ॥
कथासाबरज्योतिषां मन्त्रशास्त्रस्वरायुर्धनुर्वेदसामुद्रिकाणाम् ।
त्वमाद्यो गुरुर्योगिनामिष्टदाता शिवो ज्ञानदो गीततन्त्रागमानाम् ॥ ४१ ॥
य उद्धर्तुकामः सनन्दादिसिद्धानकार्षीत् स्वढक्काखं नृत्यगानम् ।
विमर्शे ततो दिक्चतुःसूत्रजालं शिवोऽध्यात्मशब्दादिविद्यानिदानम् ॥ ४२ ॥

कुछ अज्ञानी विष्णु को सृष्टि का पालक और आप को संहारक कहते हैं किन्तु हिरण्याक्ष हिरण्यकशिपु मधु कैटभ मुर रावण कुंभकर्ण मेघनाद खर दूषण मारीच ताड़का कंस जरासन्ध शिशुपाल, धेनुक वत्सक आदि पापियों को विष्णु भगवान ने ही मारा अतः वह प्रलाप मोहजन्य है, वस्तुतः विप्रलाप (विरोध) है ॥ ३८ ॥ हे शिव! आप की लीलायें अनेक हैं, नाम अनेक हैं, रूप अनेक हैं पर आप एक हैं। मेरे लिये उमापति, मायापति, श्रीपति, माधव, विष्णु, ब्रह्मा और शंभु एक हैं। उन्हें प्रणाम है ॥ ३९ ॥

हे पुरारे! ये अज्ञानी आप को संहारक कहते समय यह भूल जाते हैं कि समुद्रमन्थन के समय जब सब देव और असुर विष की ज्वाला से सन्तप्त थे तब आप ने ही सबकी रक्षा की। घर से निकाले और वन में गुप्त वास करते हुये पाण्डवों को अस्त्र दे कर आप ने ही बचाया। अर्जुन के रथ पर आप के ही अंशावतार हनुमान् बैठे हैं। तारकासुर गजासुर अन्धकासुर आदि से पीड़ित भक्तों की आप ने ही रक्षा की है ॥ ४० ॥

हे शिव! कथा, इतिहास, साबरतन्त्र, सत्यज्योतिष, मन्त्र, स्वरशास्त्र, आयुर्वेद, धनुर्वेद, सामुद्रिक, गायन, वादन, नर्तन, तन्त्र और आगम आदि शास्त्रों के आप आदि गुरु और योगियों के इष्ट दाता है ॥ ४१ ॥

जिन्होंने सनकादि सिद्धों के उद्धार के लिये नृत्यगान करते हुये डमरू बजाया और उससे अध्यात्म शास्त्र, शब्द (व्याकरण) विद्या आदि के निदान चौदह सूत्र उत्पन्न किये ॥ ४२ ॥

व्यधाच्छब्दमात्रेण सिद्धिं मुनीनामहं सर्वविद्येश्वरं तं नमामि ।
गृणन् पूतनामानि वाचं पुनानः शिवं सर्वदेवात्मकं भावयामि ॥ ४३ ॥
बलेर्बोधदं वामनं त्वामुपेन्द्रं ससीतं भजे सानुजं राघवेन्द्रम् ।
रथे सांजनेयार्जुनं यादवेन्द्रं शिवं सोममीडेऽधिरूढ़ं गवेन्द्रम् ॥ ४४ ॥
न जानन्ति दीना अजो भूरिरूपस्त्वमेकोसि धर्मक्षये संभविष्णुः ।
पितेवागसि क्रोधनोऽपि क्षमावान् शिवत्वाच्छिवो व्यापकत्वाच्च विष्णुः ॥ ४५ ॥
अभद्रोदयास्ते न शान्तिं लभन्ते त्रिकालेऽपि नो चित्तशुद्धिं न सिद्धिम् ।
स्वपुण्यद्विषः कुर्वते मन्दभाग्याः शिवब्रह्मकृष्णेषु ये भेदबुद्धिम् ॥ ४६ ॥
यथा भाजनानां चये मृत्तिकैका यथा भूषणानां सुवर्णे न भेदः ।
तथा मर्त्यलीलापराणाममीषां शिवाजाच्युतानां न मूले विभेदः ॥ ४७ ॥

तथा केवल शब्द से मुनियों को अभीष्ट सिद्धियां दे दीं उन सब विद्याओं के स्वामी शिव के पवित्र नामों का उच्चारण करते हुये मैं अपनी वाणी पवित्र कर रहा हूं और उनके शरीर में सब देवों का वास मान रहा हूं ॥ ४३ ॥

नृत्यावसाने नटराजराजो ननाद ढक्कां नवपंचवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

हे शिव! आप ने उपेन्द्र (विष्णु) वामन के रूप में राजा बलि को बोध दिया। सीता और लक्ष्मण के साथ वन में घूमने वाले श्री राम के शरीर में आप उदित हैं, अर्जुन के रथ में ऊपर आंजनेय हंनूमान और सामने यादवेन्द्र कृष्ण बैठे हैं। आप दोनों के शरीर में जागृत हैं। आप का एक सुन्दर रूप यह है कि उमा के साथ एक वृष पर बैठे हैं। मेरा सबको प्रणाम है ॥ ४४ ॥

हे प्रभो! कुछ दीन यह नहीं जानते कि आप अज और एक होकर भी धर्महानि के समय जन्मी और बहुरूपी हो जाते हैं। पुत्रों को आगस् (अपराध) करते देख पिता की भांति क्रोध करते हैं फिर भी क्षमाशील हैं। आप शिव (मांगलिक) होने से शिव और व्यापक होने से विष्णु कहे जाते हैं ॥ ४५ ॥ जो शिव, ब्रह्मा और कृष्ण (आकर्षक) विष्णु में भेदबुद्धि रखते हैं उनके दुर्दिन का उदय हो गया है। वे कभी भी शान्ति, चित्तशुद्धि और सिद्धि नहीं पा सकते। वे अपने पुण्य के शत्रु और भाग्यहीन हैं ॥ ४६ ॥ यदि तुम उन्हें तीन मानो तो भी जैसे अनेक पात्रों की मिट्टी एक है, अनेक आभूषणों का सोना एक है उसी प्रकार अनेक मानवलीला करने वाले शिव, ब्रह्मा और विष्णु एक हैं, तीन नहीं ॥ ४७ ॥

न कोऽप्यत्र सेव्यो न तत्सेवकोऽन्यः परो नावरस्ते मिथः सख्यभावाः ।
सुधीनां मते तत्र नो तारतम्यं शिवाद्याः सुरैरप्यचिन्त्यप्रभावाः ॥ ४८ ॥
विलापो विवाहो विवादोऽन्यपूजा रणो मित्रता लोकशिक्षार्थमेषाम् ।
सुतैर्वर्णनं कामभावस्य पित्रोः शिवान्ताय पापर्धये चास्ति तेषाम् ॥ ४९ ॥
अनेकत्वभावेऽपि सम्बन्धिनस्ते स्वसारं श्रियं विष्णवे पद्मजोऽदात् ।
शिवो भारतीं ब्रह्मणे शुक्लवर्णा शिवायादरात् कालिकां केशवोऽदात् ॥ ५० ॥
हिमाद्रेर्यतीशः स रुद्राक्षधारी स नागासनः शंखचक्राब्जधारी ।
क्वचिद्दण्डकारण्यभूभारहारी क्वचित् क्षीरसिन्धौ श्मशाने विहारी ॥ ५१ ॥
सवृन्दावने गोकुले नृत्यकारी महेशः क्वचिन्मूजवच्छैलचारी ।
स बुद्धो दयामूर्तिरार्तोपकारी शिवो दक्षबल्यादियागान्तकारी ॥ ५२ ॥

इनमें न तो कोई किसी का सेव्य (स्वामी) है, न दूसरे उसके सेवक या पुत्र आदि हैं। न कोई पर (बड़ा) है, न कोई अवर (छोटा) है। वे एक दूसरे के सखा हैं। विद्वानों के मत में उनमें तर, तम भाव नही है। सत्य यह है कि इन तीनों के चरित्र और प्रभाव इन्द्रादि देवों द्वारा भी अचिन्त्य हैं, अज्ञेय हैं क्योंकि ये परमेश्वर के अवतार हैं ॥ ४८ ॥ इनके विलाप, विवाह, विवाद, एक दूसरे की पूजा, रण मित्रता आदि कर्म लोकशिक्षा के लिये हुये हैं। जो वर्णन शिक्षाप्रद नहीं हैं वे कवियों की झूठी कल्पनाये है। इन्होंने शिव, राम, कृष्ण, विष्णु आदि की संभोगलीलाओं के जो वर्णन किये हैं वे उनके पापों के संवर्धक, और कल्याण के नाशक हैं। पुत्रों द्वारा माता पिता के कामभावों का वर्णन घोर पाप है ॥ ४९ ॥

यदि वे तीन हैं तो आपस में समान सम्बन्धी हैं। इनका तिनफेरवा विवाह हुआ है। पुराणों के अनुसार लाल ब्रह्मा ने अपनी लाल भगिनी रमा विष्णु को दी है। गोरे शिव ने अपनी गोरी भगिनी सरस्वती का विवाह ब्रह्मा से किया है और श्यामवर्ण केशव ने अपनी भगिनी कालिका शिव को दी है ॥ ५० ॥ हिमालय के यतीश शिव रुद्राक्षमाला पहनते हैं तथा विष्णु सांप पर सोते हैं और हाथों में शंख चक्र कमल गदा लिये रहते हैं (इसका सत्यार्थ पीछे लिखा है)। वे ही कभी राम रूप में दण्डकारण्य में जा कर भूभार उतारते हैं तो कभी क्षीरसागर और श्मशान में विहार करते हैं (ये आलंकारिक वर्णन हैं) ॥ ५१ ॥ शिव कभी वृन्दावन और गोकुल में तथा कभी मूजवान् पर्वत पर नाचते हैं। वे कभी दयामूर्ति, दीनबन्धु गौतम बुद्ध बन जाते हैं तो कभी दक्ष और बलि के यज्ञों का विरोध करते

स वैकुण्ठसाकेतगोलोकवासः स एवास्ति कैलासकेदारनाथः।
हरद्वारकाश्युज्जयिन्यादिगोऽयं शिवो भूभुवस्वर्गतो वैद्यनाथः॥ ५३॥
नमाम्यच्युतं गोपिकागोपगोपं हृषीकेश योगेश याचेऽवलम्बम्।
श्रुतौ मोहितानात्मजान् पाहि विष्णो शिवापन्नबन्धो न कुर्या विलम्बम्॥ ५४॥
प्रयच्छन्ति भक्ताः कृपात्यै जलं ते फलं विश्वनाथाय पुष्पासनाद्यम्।
सुलेपं च यज्ञोपवीतं सुधूपं सुजग्ध्यास्यशुद्धी धनं चाम्बराद्यम्॥ ५५॥
अहं किन्तु पूजाकृते त्वामखण्डं विभुं विश्वदेहं च नावाहयामि।
नभोद्योधरा:ारदेवाय तुभ्यं सहस्रांघ्रये चासनं नार्पयामि॥ ५६॥
खगंगाधरं निर्मलं वारिमूर्तिं न भूमिस्थदुर्वारिभिः स्नापयामि।
विहीनोऽसि वर्णेन गोत्रेण तस्मादहं ते न यज्ञोपवीतं ददामि॥ ५७॥

हैं॥ ५२॥ वे सर्वान्तर्यामी वैकुण्ठ, साकेत, गोलोक, कैलास, केदार, हरद्वार, काशी, उज्जयिनी आदि नगरियों के साथ साथ भूः भुवः स्वः लोकों के भी निवासी हैं। सर्वत्र हमारी रक्षा के लिये जाते हैं क्योंकि वैद्यनाथ हैं॥ ५३॥ मेरा उन अच्युत शिव को प्रणाम है जो हृषीकेश (सब इन्द्रियों के स्वामी) हैं, योगेश्वर हैं और कृष्णरूप में गोपों, गोपियों एवं गायों का पालन करते हैं। इन सबों ने पूर्वजन्म में घोर साधना की थी। उनसे हम अवलम्ब की याचना करते हैं और बार बार कहते हैं कि हे दीनबन्धो विष्णो! शिव! सुनी सुनाई बातों (श्रुति) में फंसे हम पुत्रों की रक्षा करें। अब इसमें विलम्ब न हो॥ ५४॥

कुछ भक्त आप को दूर से बुलाते हैं और आप की कृपा पाने के लिये आप विश्वनाथको जल, फूल, आसन, पुष्प, चन्दन, यज्ञोपवीत, धूप, दीप, सुजग्धि (भोजन) मुखशुद्धि (पान आदि), दक्षिणा और वस्त्र आदि देते हैं॥ ५५॥ किन्तु मैं जानता हूं कि आप विभु (सर्वव्यापक) और अखण्ड हैं। सारा विश्व आप का शरीर है अतः बुलाता नहीं क्योंकि आप सर्वत्र स्थित हैं। आप नभ, द्यो पृथ्वी तीनों लोकों के आधार हैं और सहस्रों हाथ पैर वाले हैं, अतः मेरे पास आप के बैठने योग्य आसन नहीं है॥ ५६॥ आकाशगंगा आप के सिर पर है और आप अष्टमूर्ति हैं। जल भी आप का शरीर है तो जल कैसे चढ़ावूं और भूमि के तो सारे जल समल हैं। आप निर्मल को वह कैसे दूं। वस्तुतः आप निर्मल को स्नान की आवश्यकता ही नहीं है। आप का न तो कोई वर्ण है न गोत्र तो यज्ञोपवीत कैसे चढ़ावूं॥ ५७॥

न विश्वोदरायाशनं वस्त्रमंभो न पित्रे खेर्दीपकं दर्शयामि ।
अवेद्यस्य वेदैः पठामि स्तवं नो सदान्तर्बहिःस्थं च नोद्वासयामि ॥ ५८ ॥
स्मरामीश तेजोमयं हृत्स्थितं त्वां स्वपुण्यात्मकं स्वासनं तेऽर्पयामि ।
शिवालापपाद्यं ददे शौचमर्घ्यं स्वभक्त्यापगावारिणा स्नापयामि ॥ ५९ ॥
स्वसन्तोषहार्दात्मकं पूतवस्त्रं सुसंकल्पयज्ञोपवीतं ददामि ।
प्रयच्छामि सद्वासनाचन्दनं ते मदत्यागजं धूपमाघ्रापयामि ॥ ६० ॥
स्तुतिध्यानलब्धामृतांभोऽशनं ते सदाचारपुष्पांजलिं चार्पयामि ।
ददे भक्तिनीराजनं च प्रदीपं मुदे सर्वगं सर्वदा त्वां स्मरामि ॥ ६१ ॥

सारा विश्व आप के उदर में है और आप सूर्य, चन्द्र, अग्नि के पिता हैं अतः मैं आप को वस्त्र देना खिलाना और दीप दिखाना अनुचित समझता हूं। जिन्हें वेद नहीं जान सके उनकी स्तुति पढ़ना और जो भीतर बाहर सर्वत्र बैठे हैं उनका विसर्जन करना भी मुझे अच्छा नहीं लगता ॥ ५८ ॥

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥
निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥
वेदवाचामवेद्यस्य किं वा स्तोत्रं विधीयते ।
अन्तर्बहिः संस्थितस्य चोद्वासनविधिः कुतः (आदिशंकराचार्य) ॥

हे ईश्वर! मैं आप के उस स्वरूप का स्मरण करता हूं जो मेरे हृदय में स्थित है और ज्योतिर्मय है। मैं उसे बैठने के लियें अपना पुण्य रूपी शुभ आसन दे रहा हूं, पाद्य के लिये शुभ वचन अर्पित कर रहा हूं, अर्घ्य में पवित्रता दे रहा हूं, और आप को अपनी भक्तिनदी के जल से नहला रहा हूं ॥ ५९ ॥

मेरा सन्तोष और प्रेम आप का पूत वस्त्र है, शिवसंकल्प यज्ञोपवीत है, शुभवासना चन्दन है और मद का त्याग ही धूप है ॥ ६० ॥

स्तुति और ध्यान से प्राप्त अमृत ही आप के लिये जल और भोजन है। मैं आप को अपने सदाचार की पुष्पांजलि और भक्ति का दीप एवं नीराजन (आरती) अर्पित कर रहा हूं तथा सर्वत्र स्थित आप का सर्वदा स्मरण करता हूं ॥ ६१ ॥

हरे राम कृष्णार्तिहन् हे मुरारे न पश्यामि गौरीश वर्त्मान्धकारे ।
महावीर हे मारजिद् गौतमार्हन् जिन त्राहि मग्नं भवाब्धावपारे ॥ ६२ ॥
गजारे हरायाहि शूलिन् पुरारे गजेन्द्रेश गोपाल देयाः प्रसादम् ।
मुहुर्नौमि नारायणं कैटभारे रमाकान्त देया न हेलावसादम् ॥ ६३ ॥
नमः शाक्यसिंहाय शौद्धोदने ते नमो धर्मराजाय ते लोकभर्त्रे ।
मुनीन्द्राय सर्वार्थसिद्धाय भद्रे प्रसक्ताय ते दुर्मखध्वंसकर्त्रे ॥ ६४ ॥
अघारे खरारे नमो दूषणारे प्रभो राम सीतापते रावणारे ।
नमः पूतनावत्सहन्त्रे गजारे शिव त्राहि दीनार्तनाथान्धकारे ॥ ६५ ॥
वहस्यच्युत क्षेमयोगं जनानां सुराणां पदं तेऽपवर्गं लभन्ते ।
समर्चन्ति सत्कर्मभिः स्वैर्हरे त्वां शिवं सुन्दरं सत्यनारायणं ये ॥ ६६ ॥

आराधयामि मणिसन्निभमात्मलिंगं मायापुरी हृदयपंकजसंनिविष्टम् ।
श्रद्धानदी विमलचित्तजलाभिषेकैर्नित्यं समाधिकुसुमैरपुनर्भवाय ॥

आसनं कल्पयेत् पश्चात् स्वप्रतिष्ठात्मचिन्तनम् ।
ब्रह्मानन्दजलेनैवाभिषेकाचमनं मतम् ॥
समस्तवासनात्यागं धूपं तस्य विचिन्तयेत् ।
ज्योतिर्मयात्मविज्ञानदीपं सन्दर्शयेद् बुधः (शंकराचार्य) ॥

हे राम, कृष्णा (द्रौपदी) की आर्ति के नांशक मुरारे, गौरीश शंकर, जिन और अर्हन् महावीर तथा मारजित् गौतम! मैं अपार संसार सागर में डूब रहा हूं। घोर अन्धकार के कारण मुझे वर्त्म (मार्ग) नहीं दीख रहा है, कृपया सहायता करें ॥ ६२ ॥

गजारि, पुरारि, शूली, हर, गजेन्द्रेश, गोपाल, नारायण, कैटभारि, रमाकान्त! अपना प्रसाद (आशीर्वाद) दें, अवहेलना रूपी विषाद न दें ॥ ६३ ॥

हे शाक्य सिंह, शुद्धोदनसुत, धर्मराज, लोकपालक, मुनीन्द्र, सर्वार्थसिद्ध, भद्रप्रद और दूषित यज्ञों के विरोधी बुद्ध भगवान्! आप को बार बार प्रणाम है ॥ ६४ ॥

अघारे, खरारे, दूषणारे, सीतापते रावणारे, पूतना वत्सासुर गजराज आदि के मारक श्री कृष्ण, दीन आर्त के नाथ अन्धकारे शिव! आपको प्रणाम है ॥ ६५ ॥ हे हरि! मैं ने सुना है कि सत्कर्मपरायण होना ही आप की सर्वोत्तम पूजा है। इसे करने वाले जनों के योगक्षेम की व्यवस्था आप स्वयं करते हैं। आप उनके लिये

सधूमाग्निवद् दृश्यते मानसं मे मलैरावृतादर्शवत् साम्प्रतं यत् ।
क्रिया हेऽमलेशाशुतोष स्मरारे भवारे द्रुतं निर्मलं दीप्तिवत्तत् ॥ ६७ ॥
भवांभोधिकैवर्त दुर्यागशत्रो स्वभक्तेषु पीयूषधाराधराय ।
नमो मीढुषे ते महादेव शंभो भवान्या समेताय मृत्युंजयाय ॥ ६८ ॥
विधातुर्हरीशादिसंज्ञस्य शक्तयै प्रकृत्यै शिवायै श्रियै शारदायै ।
नमो देवि गायत्रि सावित्रि तुभ्यं विदेहे समेषां शरीरे स्थितायै ॥ ६९ ॥
नमो ज्ञानविज्ञानमेधातितिक्षादयामित्रताशान्तिकान्त्यात्मिकायै ।
नमस्ते बुधैर्बुद्धिशुद्ध्यै स्मृतायै सतां सर्वदा मानसेषूदितायै ॥ ७० ॥
सदेहे नमो भूरिरूपेऽम्बिके ते नमो हैमवत्यै सुरैर्वन्दितायै ।
नमो भद्रिके तुष्टिपुष्ट्यादिसंज्ञे जनेभ्यः सुधीक्षेमलाभप्रदायै ॥ ७१ ॥

सदा शिव और सुन्दर हैं। जो सत्य को नारायण समझ कर उसका अनुगमन करते हैं वे सुरों का पद और मोक्ष, दोनों पाते हैं ॥ ६६ ॥ हे शिव! मेरा मन अभी भी धूमयुत अग्नि और धूल आदि से आच्छादित दर्पण की भांति मलिन है पर मेरे आराध्य देव आप अमलेश, कामारि, भवारि और आशुतोष हैं अतः अपने नामों को सत्य करें। इसे शीघ्र ही निर्मल और प्रदीप्त कर दें ॥ ६७ ॥

हे महादेव! हे शंभो! आप संसारसागर के केवट हैं, कुयज्ञोंके शत्रु हैं, अपने सन्तप्त भक्तों के लिये अमृत के धाराधर (मेघ) हैं। आप का नाम ही मीढुष (वर्षा करने वाला) है, मृत्युंजय है। भवानी समेत आप को बार बार प्रणाम है ॥ ६८ ॥ निराकार परमात्मा की विधाता हरि, ईश आदि अनेक संज्ञाये हैं और उनकी प्रकृति, शिवा, श्री, शारदा, गायत्री, सावित्री, श्रद्धा, मैत्री, दया, शान्ति, लज्जा, क्षमा, मेघा आदि अनेक निराकार शक्तियां हैं। परमात्मा की भांति ये सब भी सबके शरीर में स्थित हैं। जिन नारियों में इनका पूर्ण उदय हो जाता है वे ईशशक्ति का अवतार कही जाती हैं। उमा सीता आदि ऐसी ही हैं ॥ ६९ ॥ इनमें ज्ञान, विज्ञान, मेघा, तितिक्षा, दया, मित्रता, शान्ति, कान्ति आदि का उदय हो गया है। बुधजन बुद्धिशुद्धि के लिये इनका स्मरण करते हैं और सचमुच ये उनके मानस में उदित हो जाती हैं। इन्हें प्रणाम है ॥ ७० ॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता। या देवी सर्वभूतेषु शान्ति क्षमा श्रद्धा मैत्री क्षान्ति कान्ति तुष्टि पुष्टि बुद्धिमेघा लज्जा क्षुधा निद्रा रूपेण संस्थिता नमस्तस्यै नमो नमः (दुर्गा सप्तशती) ।

गृहे धर्ममूर्तेर्नृपस्यावतीर्णे नमस्तुभ्यमीशानि मेनात्मजायै ।
अनाथातुरापन्नदासेयदासीविपश्चिज्जरत्साधुसेवारतायै ॥ ७२ ॥
महार्घाम्बरै रत्नमाणिक्यमुक्तासुवर्णैर्वपुर्मण्डने निःस्पृहायै ।
उमे ते नमः शान्तिलज्जासुभाषाक्रियायोगविद्यादिभिर्भूषितायै ॥ ७३ ॥
अरण्ये यमे संयमे तत्परायै समानस्वभावालिभिः सेवितायै ।
शरण्ये नमो विप्रशूद्रप्लवंगैर्विहंगैर्भुजंगैः कुरंगैर्वृतायै ॥ ७४ ॥
अपर्णे नमस्ते पराधीनजीवे लताशाखिवृन्देऽनुकम्पान्वितायै ॥
तरूणां दलच्छेदने क्लेशितायै प्रसूनैः फलैः पल्लवैर्हर्षितायै ॥ ७५ ॥

शिव की शक्ति उमा के अम्बिका आदि कई नाम और रूप हैं। इन्होंने देवों को हैमवती के रूप में दर्शन दिया था। इनका एक नाम भद्रा या भद्रिका भी है। ये अपने साधक भक्तों को तुष्टि, पुष्टि, सुबुद्धि, क्षेम, लाभ आदि देती हैं ॥ ७१ ॥ उमा हिमाचल पर्वत की कन्या कहीं जाती हैं पर वस्तुतः वे वहां के राजा की पुत्री हैं। वे धर्म के अवतार प्रतीत होते थे। उनकी पत्नी मेना से उमा देवी का जन्म हुआ। वे राजकन्या होने पर भी जन्म से ही अनाथ, रोगी, शरणागत, दास, दासी, विद्वान्, वृद्ध, साधु आदि की सेवा में लगी रहती थीं ॥ ७२ ॥ उन्हें महार्घ (बहुमूल्य) वस्त्र, रत्न, माणिक, मोती, सोना आदि से शरीर को मण्डित करने की इच्छा कभी भी नहीं होती थी। वे शान्ति, लज्जा, मधुरभाषा, सत्कर्म, सेवा, योगाभ्यास, विद्या आदि को ही आभूषण मानती थीं और सबको यही शिक्षा देती थीं। उन उमा माता को प्रणाम है ॥ ७३ ॥

उमा के प्रभाव से वहां की अनेक नारियां उन्हीं के स्वभाव की बन गईं और उमा ने उनको अपनी सखी मान लिया। उमा राजसुखों का परित्याग कर हिमालय के शिखर पर स्थित एक अरण्य (वन) में जा कर यमों (अहिंसा, सत्य आदि) और संयमों (धारणा ध्यान समाधि) में तत्पर हो गईं। उनके हृदय में जन्म से जाति मानने पर श्रद्धा नहीं थी। वे वन में भक्त विप्रों और शूद्रों से तथा प्लवंगों (वानरों),पक्षियों और मृगों से घिरी रहती थीं। उनका आपसी वैर समाप्त हो गया। शरणागतवत्सला उन उमा माता को प्रणाम है। ॥ ७४ ॥ उमा को पूजा में बिल्वपत्र, तुलसी पत्र, कच्चा पुष्प आदि तोड़ना उचित नहीं प्रतीत होता था अतः उनका नाम अपर्णा हो गया। उनके हृदय में पराधीन निर्बल जीवों, लताओं, वृक्षों आदि के प्रति बहुत अनुकम्पा थी। वे वृक्षों के दलछेदन से दुखी होती थीं और

विवाहे यतीशान् गणान् वीक्ष्य शंभोः सुरांस्ते जनन्यै नमो मोदितायै ।
तदानीं प्रजाबन्धुतातान् प्रहृष्टान् समालोक्य तुभ्यं नमो हर्षितायै ॥ ७६ ॥
विषेभ्योऽवितुः पुष्टिपीयूषदातुः सुगन्धेरघोरस्य शंभोः प्रियायै ।
नमो मंगले मंगलस्यास्य तुष्ट्यै सदा प्राणिनां मंगलायोद्यतायै ॥ ७७ ॥
नमस्तेऽन्नपूर्णे प्रकाशेऽन्धकारे फलेऽन्ने जलादौ मधुस्थापिकायै ।
क्षुधा निद्रया तुष्टिपुष्टिप्रदात्र्यै नमो भर्गशक्त्यै प्रजावत्सलायै ॥ ७८ ॥
मृडानि श्रुतं त्वं सतां सर्वचिन्ता अशेषामयानापदो हंसि तुष्टा ।
वदन्त्यागमा गौरि सर्वानभीष्टान् प्रमोदं श्रियं दुष्कृतां हंसि रुष्टा ॥ ७९ ॥
नरस्यानघस्यैव शंभोस्तवांघ्रौ श्रुतं मातरुत्पद्यते भक्तिभावः ।
अपापं कथं तर्हि वां भक्तमार्ये तुदत्येष मां बोधशान्त्योरभावः ॥ ८० ॥

उनके पुष्पों, फलों एवं नूतन पल्लवों को देख हर्षित होती थीं। उन माता को प्रणाम है ॥ ७५ ॥ उमा के विवाह के समय बारात में जो महान् योगी, शिव के साधक गण और देव आये उनके दर्शन से माता मेना अतिशय मुदित हुई। प्रजागण, बान्धव और हिमाचल नरेश तो प्रहृष्ट हो गये। इस स्थिति को देख हर्षित उमा देवी को प्रणाम है ॥ ७६ ॥ भगवान् शंकर आकाश, वायु, जल आदि में स्थित अनेक विषों को नष्ट कर देते हैं, पी जाते हैं। वे घोर नहीं, अघोर हैं और उनके शरीर में अनेक प्रकार के सुगन्ध (गुण) हैं। माता उमा गुणों के कारण उनकी प्रिया हो गयीं। वेद में शंकर का नाम सुमंगल है और उमा का नाम सर्वमंगला है। माता उमा शिव की प्रसन्नता और सब प्राणियों के मंगल के लिये सदा उद्यत रहती हैं पर विवश हो कर उन्हें कर्मों का फल देना पड़ता है। उनके चरणों को प्रणाम है ॥ ७७ ॥

इनका एक नाम अन्नपूर्णा है। इन आदिशक्ति ने जल, वायु, प्रकाश, अन्धकार, अन्न, वनौषधि, फल, सूर्यकिरण, पृथ्वी के कण आदि में मधु (अमृत) की स्थापना की है। ये क्षुधा और निद्रा द्वारा हमें तुष्टि और पुष्टि देती हैं। इन प्रजावत्सल भर्गशक्ति को प्रणाम है ॥ ७८ ॥ हे मृडानि! हमने सुना है कि आप सज्जनों से सन्तुष्ट होकर उनके सारे रोगों, शोकों और संकटों को नष्ट कर देती हैं तथा आगमों का कथन है कि पापियों से रुष्ट होकर उनके सब अभीष्टों, प्रमोदों और लक्ष्मी को समाप्त कर देती हैं ॥ ७९ ॥ हे माता! मैं ने सुना है कि जिसके पाप समाप्त हो गये हैं उसी मनुष्य का आप और शिव के चरणों में भक्ति भाव बढ़ता

न लोभान्न मोहान्न रोगेभ्य आधेरभून्मे महादेवि कामान्निवृत्तिः।
न मे ज्ञानविज्ञानसत्योपलब्धौ न लोकोपकारे दृढाभूत्प्रवृत्तिः॥ ८१ ॥
मया दुर्भगेनाम्ब लब्धो न योगी गुरुर्निर्गदः सर्वहृद्भावविज्ञः।
समर्थो गमे रवेऽन्यकायप्रवेशे खलानां वधे सर्वदेशस्थितिज्ञः॥ ८२ ॥
न दैवज्ञ आप्तोऽन्धविश्वासहीनो ग्रहर्क्षादिकानां प्रभावस्थितिज्ञः।
न भूम्यब्धिगानां निधीनामभिज्ञो न सृष्टेर्नराणां गतानागतज्ञः॥ ८३ ॥
न गीतज्ञ आप्तो नृणां रोगहारी प्रशस्तस्वरालापतानाढ्यरागैः।
न तन्त्रीप्रवीणश्च लब्धो निरुद्धो विमुग्धैर्मृगर्क्षाश्वगोपक्षिनागैः॥ ८४ ॥
स नाप्तो मखज्ञो मखे येन दृष्टाः सुरा धातृशक्राग्निसूर्यानिलाद्याः।
प्रिया वा सुराणां शचीमंजुघोषाघृताचीसुकेश्युर्वशीमेनकाद्याः॥ ८५ ॥

है। तो हे आर्ये! आप दोनों के भक्त मुझ अपाप को यह बोध और शान्ति का अभाव सता क्यों रहा है ॥ ८० ॥

(जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते।)

हे महादेवि! लोभ, मोह, रोग, आधि, काम आदि से मैं अभी पूर्ण रूप से निवृत्त नहीं हो सका हूं और ज्ञान, विज्ञान, सत्य की उपलब्धि और लोकोपकार में अभी दृढ़ प्रवृत्ति नहीं हुई है ॥ ८१ ॥

हे माता! मुझ अभागे को अभी शारीरिक और मानस रोगों से विहीन, सबके मनोभावों और सब देशों कालों की स्थिति का वेत्ता, आकाशगमन परकायप्रवेश तथा पापियों के वध में समर्थ कोई योगी गुरु नहीं मिला है ॥ ८२ ॥ अभी तक ऐसा ज्योतिषी नहीं मिला है जो अन्धविश्वास से विहीन है, पुरानी उक्तियो की जांच करता है, ग्रह नक्षत्र आदि की गति स्थिति प्रभाव का यथार्थ वेत्ता है, भूमि आकाश समुद्र में स्थित निधियों का अभिज्ञ है और मनुष्यों तथा सृष्टि का भूत भविष्य जानता है ॥ ८३ ॥ मुझे अब तक ऐसा संगीतज्ञ नहीं मिला है जो प्रशस्त स्वरों के आलाप तान से युत रागों और रागिनियों द्वारा मनुष्यों के रोगों को समाप्त करता हो। वीणा सितार आदि को बजाने वाला ऐसा तंत्रीवेत्ता नहीं मिला जो विमुग्ध मृगों, भालुओं, अश्वों, पक्षियों, गायों, सर्पों आदि से घिरा हो ॥ ८४ ॥ मुझे अब तक ऐसा यज्ञवेत्ता नहीं मिला जिसने यज्ञशाला में साकार ब्रह्मा, इन्द्र, अग्नि, सूर्य, वायु आदि देवों को और उनकी प्रिया शची, सरस्वती, स्वाहा, मंजुघोषा, घृताची, सुकेशी, उर्वशी, मेनका आदि अप्सराओं को देखा हो ॥ ८५ ॥

न दृष्टः सुरः कोऽपि हन्ता खलानां गवां भक्षिणां मन्दिरध्वंसकानाम् ।
न संरक्षको वा सुरागाररक्षणे परित्यज्य मोहं सुतादेर्मृतानाम् ॥ ८६ ॥
इमां दैवविद्योगविद्देवतानां विलोक्य स्थितिं गायकानां मखानाम् ।
अमीषां महत्त्वेऽस्ति जातं नितान्तं मनः संशयाक्रान्तमप्यास्तिकानाम् ॥ ८७ ॥
अहं प्रीत एतेषु विश्वासयुक्तो मुहुः प्रार्थये देवि सिद्धेश्वरि त्वाम् ।
रहस्यस्य योगादिकानामभिज्ञान् गणान् कांश्चिदीशस्य सम्प्रेषयोर्व्याम् ॥ ८८ ॥
मृडं शंकरं ब्रूहि योगेश्वरि त्वं स्वयं वा हृदां नः कुरु ध्वान्तनाशम् ।
गुरूंस्तादृशान् देहि वा ये ददीरन् ग्रहात्मेशयोगादिबोधप्रकाशम् ॥ ८९ ॥
अशक्ता नरास्तत्पदं गन्तुमेके विनिन्दन्ति सिद्धीर्हताशा विरक्ताः ।
विना दर्शनं किन्तु सिद्धेर्न विज्ञा भवन्त्यम्ब कस्यापि शास्त्रस्य भक्ताः ॥ ९० ॥

मुझे अब तक कोई ऐसा देव नहीं मिला जिसने गोमांसभक्षी तथा मन्दिरों के ध्वंसक खलों का वध किया हो तथा जिन महापुरुषों ने गृह, पत्नी, पुत्र आदि का मोह छोड़कर देवालयों की रक्षा में प्राण दे दिये उनको बचा लिया हो ॥ ८६ ॥

ज्योतिषियों, योगियों, देवों, गायकों, याजकों आदि की यह स्थिति देख कर इस समय अनेक आस्तिकों के भी मन इनकी महत्ता के प्रति अति संशयित हो गये हैं ॥ ८७ ॥

किन्तु हे सिद्धेश्वरी माता! मुझे अभी भी इन शास्त्रों में पूर्ण प्रीति और प्रतीति है! आप से बार बार प्रार्थना कर रहा हूं कि भगवान् के कुछ ऐसे गणों को आप पृथ्वी पर भेजें जो इनके रहस्य के विशेषज्ञ हैं ॥ ८८ ॥

हे योगेश्वरि! मेरा यह निवेदन मृड शंकर को सुना दो अथवा तुम स्वयं ऐसे गुरु दे दो जो हमें ग्रह, आत्मा, ईश्वर, योग, यज्ञ, संगीत, ज्योतिष आदि का प्रबोधप्रकाश दे दें अथवा तुम हमारे हृदयों के अन्धकार को नष्ट कर हमें ही वैसा बना दो। हमने अब तक कोई भी उच्च ज्ञान नहीं पाया है ॥ ८९ ॥

यहां बहुत से ऐसे विद्वान् हैं जो इन पदों तक पहुंचने में असमर्थ हैं अतः हताश होकर इन सिद्धियों की निन्दा करते हैं, अंगूर को खट्टा कहते हैं और अपने को वैरागी सिद्ध करते हैं किन्तु हे माता! सत्य यह है कि सिद्धियों को देखे बिना मनुष्य किसी शास्त्र या शास्त्रज्ञ के भक्त नहीं बनते ॥ ९० ॥

अपर्णे नमो योगिराजप्रियायै नमो देवि सिद्धेश्वरि ज्ञानदायै ।
सुगन्धिप्रदे पुष्टिदे पाहि मातः शिवे ते नमो मंगलायै दयायै ॥ ९१ ॥
सुतानां त्रुटीरम्ब नो भावयेथाः उमे सार्द्रचित्ता प्रसन्ना भवेथाः ।
भवानि प्रजानां प्रबोधप्रकाशं प्रदायान्नपूर्णे कुरु ध्वान्तनाशम् ॥ ९२ ॥
जनो व्याकुलोऽयं शिवाधार आधौ शिवे बोधयस्थाणुमूतं समाधौ ।
कृपालोलुपं हे जनन्यल्पसत्त्वं शिवाधारमाश्वासयानन्दय त्वम् ॥ ९३ ॥
महादेवस्य विष्णोर्ब्रह्मणः शक्तिर्महादेवी, जगन्मातोदिता नित्यं
सतां चित्तेषु निष्काया । सतां धात्री खलेभ्यश्चण्डिका पायान्
महाकाली, महाविद्या महामेधा महालक्ष्मीर्महामाया ॥ ९४ ॥
विदेहा पातु मां ब्राह्मी हृदिस्था भारती वाणी, सरस्वत्यादृता
विज्ञैर्महिच्छैः शारदा देवी । प्रसन्नोपासकेभ्यो या प्रदत्ते सन्मतिं
बोधं, धृतिं कीर्तिं च विज्ञानं प्रशान्तिं नारदा देवी ॥ ९५ ॥

हे माता अपर्णे! आप योगिराज शंकर की प्रिया हैं, इन सारे ज्ञानों विज्ञानों, सुगंधों और पुष्टियों की दात्री सिद्धेश्वरी, मंगला और दया हैं। आप को प्रणाम है। विद्यादान देकर हमारी रक्षा करें ॥ ९१ ॥ माता उमा!, पुत्रों की त्रुटियों पर अधिक प्रबोधप्रकाश के अतिरिक्त और कुछ नहीं चाहिये। अतः हमारे हृदयान्धकार को नष्ट कर शीघ्र ज्ञानप्रकाश दे दें ॥ ९२ ॥ हे माता! एक शिव ही हमारे आधार हैं, पर उनका एक नाम स्थाणु (सूखा वृक्ष) रख दिया गया है। वे समाधि में डूबकर हम भक्तों को भूल जाते हैं। उन्हें जगा दें। हे जननि! हम अल्पसत्त्व होकर भी उनकी कृपा के लोलुप हैं। माता! इस शिवाधार पुत्र को थोड़ा आश्वासन दे दें ॥ ९३ ॥

जगन्माता दुर्गा निष्काया (निराकार) है। ब्रह्मा, विष्णु, महादेव कहे जाने वाले परमेश्वर की शक्ति महादेवी है। सज्जनों के हृदय में सदा उदित रहती है, उनकी धात्री है और खलों के लिये चण्डिका है। वही महाकाली, महाविद्या, महामेधा, महालक्ष्मी, महामाया आदि सब कुछ है। उस माता को प्रणाम है ॥ ९४ ॥ हमारे हृदय में स्थित वह निराकार ब्राह्मी देवी हमारी रक्षा करे जिसके भारती, सरस्वती, वाणी, शारदा आदि अनेक नाम हैं। जो विज्ञों और महाशयों की पूज्या है। जो

सदेहा पातु देवौजोभवा सा चण्डमुण्डघ्नी, क्वचिद् वीणाकरा जाड्यापहा
श्वेताम्बरा वाणी । क्वचिद् दाक्षायणी दुर्यागतो रुष्टा सती माता
शिवा योगेश्वरी शैलेशबाला क्वापि शर्वाणी ॥ ९६ ॥
अपायात्तारिणी तारा क्वचित् सिंहासना दुर्गा कदाचित् शंभु-
शीर्षस्था नभोगा भूमिगा गंगा । सदा शान्ता प्रपन्नापत्स्वशान्ता
पातु मीनाक्षी कुमारी ब्रह्मचारिण्यादिशक्तिर्विन्ध्यशैलंगा ॥ ९७ ॥
जयन्ती मंगला सर्वेश्वरी सिद्धेश्वरी पायात्, स्वधा स्वाहा
शताक्षी चन्द्रघण्टा भ्रामरी पायात् । सतां नन्दा जया पूर्णा सुभद्रा
रिक्तताहन्त्री खरस्था शीतला कात्यायनी शाकंभरी पायात् ॥ ९८ ॥

प्रसन्न होने पर अपने उपासकों को सन्मति, प्रबोध, धैर्य, प्रतिष्ठा, विज्ञान, प्रशान्ति और नार (आनन्द) आदि देती है ॥ ९५ ॥

देवगण दैत्यों से बार-बार हार रहे थे। उनका स्वर्ग छिन गया था। तब ब्रह्म ने बताया कि एकता का अभाव ही आप की पराजय का कारण है। तब उन्होंने अपने ओज को एकत्रित किया। उससे जो देवी बनी उसी ने महिषासुर, चण्ड, मुण्ड आदि दैत्यों को समाप्त किया। वही माता कभी जड़ता को दूर करने वाली श्वेताम्बरा वीणापुस्तक धारिणी वाणी (सरस्वती) का रूप धारण कर लेती है, कभी अपने पिता दक्ष के हिंसात्मक यज्ञ से रुष्ट होकर सती हो जाती है और कभी हिमाचल प्रदेश के महाराज की योगेश्वरी कन्या भवानी उमा हो जाती है ॥ ९६ ॥ कभी विघ्नों के सागर से पार करने वाली सिंह पर बैठी दुर्गा बन जाती है तो कभी तारों से बनी आकाशगंगा हो जाती है। इसका एक नाम तारा और दूसरा गंगा है। यह ब्रह्माण्डाकार व्योमकेश शिव के सिर पर बैठी सूक्ष्म जलमयी और तारामयी गंगा है। यह सदा शान्त रहती है पर सन्तों के आपत्तिकाल में उन शरणागतों की रक्षा के लिये अशान्त भी हो जाती है। इसके मीनाक्षी, कुमारी, ब्रह्मचारिणी, आदिशक्ति और विन्ध्यवासिनी आदि अनेक नाम हैं और उनकी कथायें प्रबोधप्रद हैं ॥ ९७ ॥ यह माता जयदात्री होने से जयन्ती और मंगलदात्री होने से सर्वमंगला कही जाती है। इसी के नाम पर तिथियों के नन्दा, भद्रा, जया, रिक्ता, पूर्णा नाम रखे गये हैं। वे सब शुभ हैं। रिक्ता रिक्तता की

दुराधर्षा सुगन्धा पुष्टिदा मा हैमवत्यार्या कदाचिद् रुक्मिणी सीता
हरेराराधिका रामा । कदाचित् कौशिकस्था पातु लक्ष्मीश्चंचला
माता सुपर्णस्थेन्दिरा नारायणी पद्मालया पद्मा ॥ ९९ ॥
विशुद्धज्ञानदेहस्य त्रिवेदीचक्षुषः शंभोः प्रियायास्ते न जानाम्यस्त्र-
शंस्त्राणामभिप्रायम् । अनेकाख्यापि रुद्राणि त्वमेकैवोदिता विज्ञैर्न
जाने ते स्वरुपाणां रहस्याभिज्ञतोपायम् ॥ १०० ॥
वरेण्यं धीतमोघ्नं नैव भर्गस्ते दृशा दृष्टं न चिन्त्यं योगिभी
रूपं कथं ते चिन्तयामीशे । हृदिस्थांश्चण्डधूम्राक्षादिदैत्यांश्चण्डिके
हन्या रतिं योगीश्वरे तन्या इति त्वां प्रार्थयामीशे ॥ १०१ ॥

नाशिनी है। यही माता शताक्षी, चन्द्रघण्टा, भ्रामरी, खरस्था शीतला, कात्यायनी, शांकभरी आदि है ॥ ९८ ॥ यह दुराधर्षा सुगन्धा पुष्टिदा हैमवती आर्या, मा, रमा, आदि नामों वाली है और यही कभी-कभी मानवरूपधारी परमात्मा की आराधिका पत्नी (रामा) सीता और रुक्मिणी बन जाती है। यह कभी उल्लू (कौशिक) पर बैठने वाली चंचला लक्ष्मी बन कर हमें शिक्षा देती है कि धन के दास मत बनो और कभी गरुड़ पर बैठने वाली इन्दिरा, नारायणी, पद्मालया और पद्मा हो जाती है। यह माता सदा हमारी रक्षा करे ॥ ९९ ॥ हे माता तुम उन विश्वनाथ की प्रिया हो जिनका देह केवल विशुद्ध ज्ञान है और तीन वेद (ज्ञान) ही जिनके तीन नेत्र हैं अतः तुम्हारे हाथों में जो नाना प्रकार के साकार शस्त्र अस्त्र हैं उनका अभिप्राय मैं अभी तक नहीं जान सका हूं। हे माता! विद्वानों का निर्णय है कि तुम्हारे नाम अनेक हैं पर तुम एक हो अतः मैं तुम्हारे इन अनेक रूपों का भी पूरा रहस्य नहीं जान सका हूं ॥ १०० ॥

हे गायत्री माता! मैंने सुना है कि तुम्हारा वरेण्य भर्ग (श्रेष्ठ तेज) बुद्धि के तम को समाप्त कर देता है पर मैंने अभी तक उसको इन नेत्रों से नहीं देखा है अतः कृपया मुझे दिव्य दृष्टि दो। तुम्हारा रूप जब योगियों द्वारा भी अचिन्त्य है तो मैं इन नेत्रों से उसे कैसे देख सकूंगा। मा! मेरी बार-बार प्रार्थना है कि तुम मेरे हृदय में बैठे चण्ड, मुण्ड, धूम्राक्ष आदि दैत्यों को मार डालो और मेरी भक्ति योगीश्वर शंकर के चरणों में बढ़ा दो ताकि मैं दिव्य दृष्टि से उनके और तुम्हारे वास्तव रूपों को देख लूं ॥ १०१ ॥

न जाने मे जगत्यां को हितार्थी कश्च लाभो वा तमस्यन्धे निलीन-
स्त्वां निरालम्बो भजाम्यार्ये । दयाप्त्यै सप्रयत्नोपीन्द्रियार्थान्धो
भ्रमाम्यार्ये हताशो मन्त्रकल्पं नाममात्रं ते जपाम्यार्ये ॥ १०२ ॥
त्वयैतद् धार्यते विश्वं त्वयैतत्पाल्यते मातः तथा कुर्या यथाहं
नो दुराचारेषु यानीशे । क्षमाशीले शरण्ये वत्सले गायत्रि मांगल्ये
निरस्तः सर्वतस्त्वत्तोऽपि धूतो नो भवानीशे ॥ १०३ ॥

हे जगदम्ब! पता नहीं, संसार में मेरा हितार्थी कौन है और मेरा लाभ कहां है। इसलिये घोर अन्धकार में निलीन हूं और निरालम्ब होकर तुम्हारा भजन कर रहा हूं। यद्यपि तुम्हारी कृपा पाने के लिये प्रयास कर रहा हूं फिर भी पांचो इन्द्रियों के विषय मुझे अन्धा बना कर भरमा रहे हैं, नचा रहे हैं अतः हताश होकर इस समय केवल तुम्हारे पावन नामों का जप कर रहा हूं ॥ १०२ ॥ हे माता! तुम जगज्जननी हो। तुम्हीं इस संसार का धारण और पालन करती हो अतः मुझे बचा लो, मैं दुराचारों की ओर कभी न जावूं। हे ईशे! क्षमाशीले, शरण्ये, वत्सले, गायत्री माता! सब ओर से उपेक्षित और तिरस्कृत मुझ पुत्र का तुम भी त्याग न कर देना ॥ १०३ ॥

षष्ठोध्यायः

कर्मफलं सुनिश्चितम्

हे विश्वनाथ शतशक्तिप साधुबन्धो शंभो शरण्य मृड मन्मथजित् सुरेश ।
मातर्महेश्वरि भवानि मृडानि दुर्गे हे मंगले महिषमर्दिनि रक्ष पुत्रान् ॥ १ ॥
खिन्नोस्मि योगनियमांश्च यमानवेक्ष्य त्यक्तान् मठेशयतिभिर्धनकीर्तिलीनैः ।
मत्स्येन्द्रनाथमुनिदत्तमठेषु मायां मान्यानघोरमतगांश्च विलोक्य घोरान् ॥ २ ॥
शास्त्रार्थतर्करतविस्मृतपंचशीलान् भिक्षूनवेक्ष्य विभवाढ्यविहारसौधे ।
सम्यक्स्मृतीक्षणसमाधिसुकर्महीनान् तन्त्रेषु फल्गुषु रतानपि वज्रयोगे ॥ ३ ॥

हे अनेक शक्तियों के स्वामी, साधुबन्धु, शरणागतवत्सल, सुखशान्ति के दाता, कामेश्वर, सुरेश, विश्वनाथ! हे माहेश्वरी भवानी मृडानी महिषमर्दिनी मंगला दुर्गा माता, आप पुत्रों और देश की रक्षा करें ॥ १ ॥ हम इस समय देश की यह स्थिति देख कर अतिशय खिन्न हैं कि हमारे मठाधीश योगशास्त्र के यम, नियम आदि आठ अंगों की साधना का परित्याग कर धन और यश में लीन हो गये हैं। भगवान मत्स्येन्द्रनाथ, बाबा गोरखनाथ दत्तात्रेय आदि मुनीश्वरों के मठों में अब वह योग दिखाई नहीं दे रहा है जिसने अगणित दुराचारियों को अपने प्रभाव से; चमत्कार से सदाचारी बना दिया। आज अघोर पन्थ घोर हो गया है। अघोरी सन्त मायावी और मांस मदिरा धूम्रपान, गांजा, भोगँ, अफीम आदि के भक्त हो गये हैं ॥ २ ॥ भगवान् बुद्ध ने दुःखनाश के लिये अति उत्तम अष्टांगिक मार्ग (सम्यक् दृष्टि, संकल्प, वाणी, कर्म समाधि आदि) और पंचशील (अहिसा सत्य अचौर्य ब्रह्मचर्य मादकद्रव्यत्याग) बताया था पर अब बौद्ध भिक्षु इन्हें भूल कर उस शास्त्रार्थ और तर्क में रत हैं जिसका बुद्ध ने विरोध किया था। अब यहां दर्शन के सौत्रान्तिक, वैभाषिक, माध्यमिक, योगाचारी चार सम्प्रदाय हो गये हैं। भिक्षुगण वैभव युत भव्य विहारों में रहते हैं। अब वे निरर्थक तन्त्रों और वज्रयोग (वाममार्ग) में रत हैं ॥ ३ ॥

त्रस्तोभि नेतृनृपमन्त्रिगुरूनवेक्ष्य पाखण्डपीडनपरिग्रहपंकमग्नान् ।
पूर्णान् धराग्निगगनश्वसनान् कुधूमैरम्बार्चनं पिशितरक्तसुरादिपानैः ॥ ४ ॥
जातं मनोऽस्ति मलिनं नवदुष्कथाभिः श्रीकृष्णरासनवचित्रपटोत्थगानैः ।
काव्यं लभे विरलमेव विवेकपूर्णं शृंगारमुज्वलमहं क्वचिदेव चापम् ॥ ५ ॥
दैवज्ञकल्पितनवग्रहकुण्डलिभ्यो भीतं रुणद्धि तिथिलग्नमुहूर्तपाशः ।
तस्मात् स्वदेशगुरुसाधुनृपानुरागः क्षीणः क्व यानि परमेश्वर शान्तिलब्ध्यै ॥ ६ ॥
आसं समाधिसुरथाख्यमहीपतुल्यो येषां कृतेऽहमुचितानुचितं न वेद ।
लाभस्थितौ परमखिन्नमना अभूवं हानिस्थलेष्वभवमाढ्य इव प्रसन्नः ॥ ७ ॥

मैं अपने नेताओं, अनेक उच्चपदाधिकारियों (नूतन नृपों), मंत्रियों, अध्यापकों और गुरुजनों की स्थिति देख कर त्रस्त हूं। ये पाखण्ड, पीड़न और परिग्रह (शोषण) के कीचड़ में डूब गये हैं। पृथ्वी, आकाश, वायु और अग्नि दूषित धूमों से परिपूर्ण हो गये हैं और दयामयी जगदम्बा का पूजन मांस, रक्त, मदिरा आदि से हो रहा है ॥ ४ ॥

नूतन दूषित उपन्यासों से, कथाओं से, योगेश्वर कृष्ण की रासलीलाओं से, चित्रपटों के नग्न चित्रों से और अश्लील गीतों से मनुष्यों के मन सदोष हो गये हैं। विवेकपूर्ण शिक्षाप्रद काव्य क्वचिदेव उपलब्ध हैं और उज्वल शृंगार रस मैंने कहीं कहीं पाया है ॥ ५ ॥

संस्कृत में सांप को कुण्डली कहते हैं। हम ज्योतिषियों द्वारा कल्पित नवग्रह रूपी कुण्डलियों से भयभीत हैं। ये ग्रह देव होकर भी हमारे लिये भीषण राक्षस हो गये हैं। अब ग्रह शब्द का अर्थ ही उलट गया है। इस समय हमारा भीत मन तिथि, लग्न, मुहूर्त आदि अनेक पाशों में बंध गया है। इस कारण स्वदेश, गुरु, साधु, रक्षक मंत्री आदि के प्रति जो अनुराग था वह क्षीण हो गया है। हे परमेश्वर हम शान्तिप्राप्ति के लिये कहां जायें ॥ ६ ॥

दुर्गासप्तशती में समाधि वैश्य और सुरथ राजा की दो शिक्षाप्रद कथायें हैं। इन दोनों ने उचित अनुचित का विचार किये बिना परिवार के लिये बहुत धन कमाया पर इनके स्वजन शत्रु हो गये। मेरी भी यही स्थिति है। मैं लाभप्रद पुण्यकर्म को अपनी हानि और हानिप्रद पापकर्म को लाभ समझ रहा हूं। उसमें प्रसन्न हो जाता हूं ॥ ७ ॥

येषां कृते विविधनिन्द्यतरैरुपायैः आसं धनार्जनपरः चतुराभिधोऽज्ञः ।
तैरेव पुत्रवनिताभिजनैरिदानीं उद्वासितोऽस्मि हतबुद्धिरहं महेश ॥ ८ ॥
लेशोऽपि नास्ति हृदयेषु कृतज्ञतायाः प्रेम्णा श्रमेण बहुलेन पुरस्कृतानाम् ।
आयासतो विरचितं भवनं कराले कारागृहे परिणतं कुधिया निजानाम् ॥ ९ ॥
तस्मात् कृशोऽस्ति कुलजातिपुरादिमोहो देव प्रयच्छ शिवदं स्वपदं पुरारे ।
तातोद्धर स्वजनतोयनिधावपारे पुत्रादिनक्रबहुले पतितं भवारे ॥ १० ॥
यानीह सन्ति वसुधावसुकीर्तिकामाद् अस्मत्कृतानि वयुनानि विभोऽसि विद्वान् ।
विश्वानि तानि दुरितानि परासुवाशु यद् भद्रमासुव च तत् सवितर्दयालो ॥ ११ ॥
राये तडिद्द्युतिवते सुपथा नयास्मान् भूयो विधेम नम उक्तिमुमापते ते ।
व्रीडानुतापजनशापभृतां सुतानां सर्वं युयोधि नमतां जुहुराणमेनः ॥ १२ ॥

मैं अज्ञ अपने को चतुर समझता हूं। जिनके लिये अनेक निन्दित कर्मों द्वारा धन कमाया उन्हीं पुत्र पत्नी द्वारा आज तिरस्कृत हूँ, हताश हूं ॥ ८ ॥ जो बड़े प्रेम और श्रम से पुरस्कृत किये गये उनके हृदयों में कृतज्ञता का स्पर्श भी नहीं है। स्वजनों की इस दुर्बुद्धि के कारण परिश्रम से बनाया भव्य भवन मेरे लिये कारागार हो गया है ॥ ९ ॥ हे भवारे! इस कारण मेरा स्वकुल, स्वजाति, स्वपुर आदि का मोह कृश हो गया है अतः अब अपना कल्यांणप्रद पद देने की कृपा करें। हे तात! हे पुरारे! मेरा उद्धार करें। मैं इस समय उस अपार स्वजनसागर में डूब रहा हूं जिसमें पुत्र पौत्र आदि नामों वाले अनेक मगर बैठे हैं ॥ १० ॥

अग्ने नय सुपथा रायेऽस्मान् युयोध्यस्मदेनः (यजुर्वेद ४०) ।
के शत्रवो मित्रवदात्मजाद्याः (शंकराचार्य) ।

हे विभो! हमने धरती, धन, कीर्ति आदि की कामना से जो भीषण वयुन (पाप) किये हैं उन सबों को आप जानते हैं। अब उन पापों को शीघ्र दूर करें और हे दयालु सवितृदेव! हमें वह दें जो हमारे लिये परिणाम में भद्र हो (ये तीन श्लोक यजुर्वेद संहिता ४० और ईशावास्योपनिषत् के तीन मन्त्रों के अनुवाद हैं) ॥ ११ ॥ हे तात उमापते! मैं आप से बार-बार यह प्रार्थना कर रहा हूं कि तडित् (बिजली) की भांति द्युति वाले, अत्यन्त आकर्षक इस राय (धन) की ओर हमें सुमार्ग से ले चलें। हम पुत्रों ने इसकी प्राप्ति के लिये जुहुराण (महान्) एनस् (पाप) किये हैं। इससे हमें जनता का बहुत शाप मिल रहा है। हमें इस बात की व्रीडा (लज्जा) है, पश्चात्ताप है। अतः आप इन्हें नष्ट कर दें और हम शरणागतों

दुर्दैवतोऽपिहितमस्ति हिरण्मयेन पात्रेण सत्यमुखमेतदपावृणु त्वम् ।
पूषन् मयोभव तथा कुरु मे मनीषां दृष्टो यथा भवति शंकर सत्यधर्मः ॥ १३ ॥
श्रुत्वा भगीरथकथामभवन्मतिर्मे घोरां करोषि भगवन् भजतां परीक्षाम् ।
गौर्या निशम्य तप उग्रमपर्णमीश त्वं नाशुतोष इति खेदपरोऽहमासम् ॥ १४ ॥
शार्दूलजम्बुकबिडालवृकोरगाणां दृष्ट्वातिनिर्दयतया मृगयाकुचेष्टाम् ।
मांसाशिनां खगशुनामथ मानवानां दृष्ट्वा भृशं बलवतामबलेऽभिचारम् ॥ १५ ॥
आसीदिदं मम मतं जगति व्यवस्था नास्त्यत्र नास्ति भगवांश्च जगन्नियन्ता ।
चेदस्ति दुःखबहुरोगकुबुद्धिदोऽयं क्रूरः कथं भवितुमर्हति दीनबन्धुः ॥ १६ ॥
साक्षाद् हरिर्बहुमखव्रतदानपुण्यैः प्रीतस्तपोभिरगमत् कुशलाय यत्र ।
यत्रांगणे हसति नृत्यति मोदतेऽके तत्रावलोक्य कलहार्तिघृणाविलापान् ॥ १७ ॥

को सुमति दे दें ॥ १२ ॥ हे पूषन् शंकर! दुर्भाग्य से सत्यपात्रका मुख सोने के ढक्कन से ढक गया है। सुवर्ण का लोभ सत्य की ओर नहीं जाने दे रहा है। हे मयोभव! अब आप इस सुवर्ण को हटाकर हमें सत्य का दर्शन करा दें। हमारी मनीषा (बुद्धि) को निर्मल कर दें ॥ १३ ॥

हे भगवान्! भगीरथ की कथा सुन कर मेरा मन कहने लगा कि आप भक्तों का घोर परीक्षण करते हैं। हे ईश! माता गौरी ने सूखा पत्ता खाना भी छोड़ दिया। उनके उग्र तप की कथा सुन कर मुझे विश्वास हो गया कि आप आशुतोष नहीं हैं। इसका मुझे खेद था ॥ १४ ॥ मैंने देखा कि बाघ, सियार, बिडाल, भेड़िया, सांप आदि हिंसक जीव कुछ जीवों को बड़ी निर्दयता पूर्वक मार कर खा जाते हैं। मांसाहारी पक्षी, कुत्ते और मानव तथा अनेक बलवान् निर्बलों पर अत्याचार करते हैं ॥ १५ ॥

इन घटनाओं को देख कर मुझे विश्वास हो गया कि संसार में कहीं भी सुव्यवस्था नहीं है और भगवान् नाम का कोई चेतन प्राणी इस संसार का नियामक नहीं है। ईश्वर है ही नहीं। यदि है तो अनेक प्रकार के रोगों का, कष्टों का और दुर्बद्धि का दाता वह क्रूर दीनबन्धु कैसे हो सकता है ॥ १६ ॥

अनेक यज्ञों; तपों, व्रतों, दानों और पुण्यों से प्रसन्न हो कर सुख शान्ति देने के लिये साक्षात् हरि दशरथ के घर उनके पुत्र रूप में आये। वे उनके आंगन में हंसते थे, नाचते थे, उनकी गोद में प्रसन्नता से बैठते थे पर वहां भी कलह, कष्ट, घृणा और विलाप आदि आ गये ॥ १७ ॥

शुद्धोदनं दशरथं वसुदेवनन्दौ तेषां प्रजाः प्रणयिनः सचिवांश्च भार्याः ।
श्रुत्वा चिरं प्ररुदतो रुदतीश्च शुग्भिर्ज्ञातं न ते भवति दर्शनतोऽघनाशः ॥ १८ ॥
यस्य ध्वजेऽस्ति भवदंशभवो हनूमान् व्यासेन्द्रकृष्णगिरिजाश्च भवान् सहायाः ।
पुत्रस्त्वनाथ इव तस्य हतोऽभिमन्युः कृष्णासुता अपि हता निशि निःसहायाः ॥ १९ ॥
सीतां सुतां दशरथस्य सुरेशसख्युर्जायां हरे रघुपतेरसुरेण नीताम् ।
योगीशवन्द्यजनकस्य सुतामरण्ये त्यक्तां निशम्य निकटप्रसवां पुनीताम् ॥ २० ॥
श्रीरामकृष्णरमणादिमहामुनीनां देहामयं विपुलपापवतां च वृद्धिम् ।
श्रुत्वा च दानिनृगभूपकुपूययोनिं धर्मे तथा भवति सांशयिकं मनोऽभूत् ॥ २१ ॥
चेतोऽन्धकारशमनोऽधिगतः प्रकाशो नास्त्यन्धकेश हृदि सम्प्रति संशयो मे ।
धीरप्रबुद्धवचसां गरिमाऽनुभूता ज्ञातं शुभाशुभमिदं स्वकृतेर्विपाकम् ॥ २२ ॥

मैंने सुना कि दशरथ ही नहीं, महाराज वसुदेव शुद्धोदन नन्द आदि के घर भी वे उसी प्रकार रहे पर यह भी सुना कि इनको, इनकी प्रजा को, मित्रों को, मंत्रियों और पत्नी आदि को चिर काल तक शोकाकुल होकर रोना पड़ा। सारांश यह कि आप के केवल दर्शन से पापों का नाश नहीं होता ॥ १८ ॥ जिन अर्जुन के रथध्वज में आप के अंश हनुमान् जी बैठे थे और व्यास, इन्द्र, कृष्ण, पार्वती और आप जिसके सहायक थे उनका पुत्र अभिमन्यु अनाथ की भांति मारा गया और द्रौपदी के पांचो पुत्र रात में असहाय की भांति मारे गये ॥ १९ ॥ देवराज इन्द्र के मित्र महाराज दशरथ की पुत्रवधू, साक्षात् हरि रघुपति राम की पत्नी और योगियों के पूज्य विदेह जनक की पुत्री सीता को एक राक्षस बल पूर्वक पकड़ कर ले गया और वे दूसरी बार प्रसव काल में निर्जन वन में फेंक दी गईं जब कि सर्वथा निर्दोष थीं ॥ २० ॥ मैंने यह भी सुना कि रामकृष्ण परम हंस, महर्षि रमण, स्वामी विवेकानन्द, स्वामी शिवानन्द आदि यती रोगी होकर मरे तथा अनेक महापापी सब प्रकार से सुखी हैं। मैंने यह भी सुना कि महादानी राजा नृग को गिरगिट की जघन्य योनि में जाना पड़ा। अतः मेरा मन धर्म में, आप की सत्ता में और आप की व्यवस्था में सन्देहग्रस्त हो गया था ॥ २१ ॥

किन्तु हे अन्धकेश! अब मैंने चित्त के अन्धकार का नाशक प्रकाश पा लिया है। अब मेरे हृदय में कोई संशय नहीं रह गया है। मुझे धीर और प्रबुद्ध योगियों के अनुभूत वचनों की गरिमा का अनुभव हो गया है। मैंने जान लिया है कि सारा शुभ अशुभ कर्मों का विपाक हैं ॥ २२ ॥

ज्ञातं मया जगति दिग्जयिनो नृपा ये सन्ति प्रसिद्धकवयः सचिवा मुनीशाः।
विद्वांस आदृततमा उत नेतृवर्याः कुर्वन्ति तेऽपि मनसो विकृतौ कुकृत्यम् ॥ २३ ॥
नो विद्यते क्वचन कर्मफलप्रदाता जन्मान्तरं कृतिफलं नृमनःप्रसूतम्।
मत्वेति नास्तिकनराश्च भवन्ति सक्ताः पापे पदं च विभवं मधु मन्यमानाः॥२४॥
भूत्वा कदाचिदचिराय समृद्धिमन्तः शत्रुंजया बहुधराधनधान्यगेहाः।
पश्चाद् भवन्ति दुरितौघविपाककाले ते पौत्रनप्तृसमये सगदा दरिद्राः ॥ २५ ॥
नो पर्वतस्य विवरे न समुद्रमध्ये नैवाम्बरे न हि रसातलनाकयोर्वा।
एतादृशोऽस्त्यघवते निलयस्त्रिलोके यत्र स्थितो भवति कर्मफलाद् विमुक्तः ॥२६॥
भस्मावृताग्निरिव सन्दहदेति काले न क्षीरवद् दुरितमाशु फलं ददाति।
लब्ध्वेह शोचति नरोऽश्रुमुखोऽस्य पाकं भुंक्ते परत्र विवशोऽन्यभवे त्रितापम्॥२७॥
रामो जघान युधि वालिनमिन्द्रसूनुं सुग्रीवमर्कतनयं च ररक्ष मित्रम्।
सूतो बभूव पुनरिन्द्रसुतार्जुनस्य तस्मै ददौ स्वभगिनीं सुहृदे सुभद्राम् ॥ २८ ॥

मैंने जान लिया है कि संसार के अनेक दिग्विजयी भूप, विख्यात कवि, मंत्री, मुनि, समाज में आदृत विद्वान्, बड़े-बड़े नेता आदि आस्तिक एवं पुजारी होने पर भी मन की विकृत अवस्था में कुकर्म करते हैं ॥ २३ ॥ नास्तिकों का कथन हैं कि पुनर्जन्म नहीं होता, कर्मफल नहीं मिलता और मरण के साथ आत्मा भी समाप्त हो जाती है। कर्मफल मनुष्यों की एक मिथ्या कल्पना है। ये वैभव और पद को ही अमृत मान कर नाना प्रकार के पाप करते हैं ॥ २४ ॥ परन्तु ये शत्रुओं को जीत कर कुछ दिनों के लिये समृद्धिमान् और अत्यधिक धरा, धन, अन्न, गृह आदि के स्वामी हो जाते हैं तथा दुरितों (पापों) के समूह के विपाक के समय, अपने नाती पोतों के काल तक दरिद्र और रोगी हो जाते हैं ॥ २५ ॥

पापी के लिये पर्वत की गुफा में, समुद्रतल में, आकाश में, रसातल में, स्वर्ग में तथा तीनों लोकों में ऐसा कोई निलय (गृह) या सुरक्षित स्थान नहीं है जहां छिपकर वह अपने कर्मों के शुभ अशुभ फलों से मुक्त हो जाय ॥ २६ ॥ दुरित (पाप) दूध की भांति तुरत फल नहीं देता। वह राख से ढकी आग की भांति समय पर प्रज्वलित होकर जला देता है। इसके परिपाक को पाने के बाद मनुष्य रो रोकर उसे भोगता है। विवश होकर दूसरे जन्म में, दूसरे लोक में भी दैहिक दैविक भौतिक तीनों तापों को भोगता हैं ॥ २७ ॥ श्रीराम ने इन्द्रपुत्र वाली को नियम के विरुद्ध वृक्ष की आड़ से मारा और अपने मित्र सूर्यसुत सुग्रीव की रक्षा की किन्तु

पूर्वं सुकण्ठ इह सूर्यसुतः स कर्णः कृष्णाज्ञया युधि हतो विरथोऽर्जुनेन ।
वृक्षान्तरस्थरघुनाथशरेण यद्वद् बाली हतो मृगयुणाऽत्र तथैव कृष्णः ॥ २९ ॥
सेवानुशासनपरायणलक्ष्मणोऽभूत् ज्येष्ठो बलोऽप्यवरजोऽस्य बभूव कृष्णः ।
श्रीराम इत्युपदिदेश निजावतारात् नो कोऽपि कर्मफलतो भविता विमुक्तः ॥ ३० ॥
आसन् समेऽप्यतिरथाश्च महारथा ये कृष्णात्मजा अतिबला अपरैरजेयाः ।
साम्बादयः कुसृतिहास्यमदाभिभूता उद्वेजयन् स्वपितुराश्रयतो जगत्ते ॥ ३१ ॥
ऊर्जस्विनो भृशमुपाधिपरान् कुमार्गान् दृष्ट्वा यदून स्वतनयान् भगवान् दयावान् ।
निन्ये तदीयहृदयेषु महादुराधीन् चक्रुर्मिथो रणमिमे जगतो हिताय ॥ ३२ ॥
मैरेयपा बहुवदा विविधायुधोग्राः पुत्रा अयुत्सत जरत्पितृभिः पितृव्यैः ।
जामातरो युयुधिरे श्वशुरैर्मदान्धाः कृष्णेच्छया विनिहताः सुहृदः सुहृद्भिः ॥ ३३ ॥

कृष्णावतार में इसका प्रायश्चित्त किया। यहां वे इन्द्रसुत अर्जुन के सारथी बने और परम मित्र अर्जुन को अपनी भगिनी सुभद्रा स्वयं दी। उनके पिता और भाई ऐसा नहीं चाहते थे फिर भी कृष्ण नहीं माने ॥ २८ ॥

सूर्यसुत सुकण्ठ (सुग्रीव) ही दूसरे जन्म में सूर्य सुत कर्ण हो गया। जो रामावतार में मित्र था वह कृष्णावतार में शत्रु बन गया और वह रथहीन अवस्था में कृष्ण की आज्ञा से अर्जुन द्वारा मारा गया। राम ने वृक्ष की ओट से वाली को मारा था। वाली के पुत्र अंगद ने मृगयु (व्याध) बन कर राम की भांति सोते कृष्ण को मारा ॥ २९ ॥ अनुशासन परायण लक्ष्मण ने राम की अति सेवा की। परिणाम यह हुआ कि दूसरे जन्म में लक्ष्मण बड़े भाई बलभद्र हो गये और श्रीराम सेवा करने के लिये छोटे भाई कृष्ण बन गये। श्रीराम ने अपने अवतारों द्वारा यह शिक्षा दी कि कर्मफलों से कोई भी मुक्त नहीं हो सकता ॥ ३० ॥ कृष्ण के साम्ब आदि सभी पुत्र पौत्र अतिबली, शत्रुओं द्वारा अजेय, अतिरथी और महारथी थे। वे कुमार्ग, हास्य, अहंकार आदि से मत्त हो गये थे और अपने पिता कृष्ण के बल पर पूरे जगत् को उद्वेजित कर रहे थे ॥ ३१ ॥ दयालु भगवान् ने अपने यदुवंशी परिवार को बलवान्, अति उपाधिरत और कुमार्गी देख कर संसार के हित के लिये उनके हृदयों में अनेक दुर्भाव भेज दिये। वे आपस में ही लड़ने लगे ॥ ३२ ॥

वे मदिरा पी-पी कर बहुत बोलने लगे। अब में नाना प्रकार के आयुध लेकर उग्र हो गये। पुत्रगण अपने वृद्ध चाचा और पिता से युद्ध करने लगे। कृष्ण की इच्छा से जामाता मदान्ध होकर अपने श्वशुरों की और मित्र मित्रों की हत्या

क्षीणायुधा विविधुरेरकमुष्टिभिस्ते क्रुद्धा बलेन हरिणा च निवार्यमाणाः ।
तौ हन्तुमीषुरपतंश्च जवात्ततोऽमू रामाच्युतावपि विजघ्नतुरेरकाभिः ॥ ३४ ॥

ता एरकाः करगताः परिघा अभूवन् वज्रोपमा विनिहता यदवः समे तैः ।
कृष्णो गतो निजपदे रुदतो वयस्यान् हित्वा यदून् निजपितॄन् स्वजनादिमोहम् ॥ ३५ ॥

द्रोणोऽर्जुनस्यरुचिमोहवशंगतत्वात् शिष्यैकलव्यशबरस्य यतो जहार ।
अंगुष्ठमानततरस्य पुनीतबुद्धेर्विद्धोऽर्जुनेन विशिखैर्निहतश्छलेन ॥ ३६ ॥

आजीवनं सकलकौरवपांडवानां गोप्ता महापुरुष आप्तवरश्च भीष्मः ।
सेहे स्वगोत्रगुरुमोहवशंगतत्वादम्बासतीपरशुरामगुरोर्विरोधम् ॥ ३७ ॥

करने लगे ॥ ३३ ॥ आयुधों के समाप्त हो जाने पर वे एरक (मोथा) और मुष्टिका से ही प्रहार करने लगे। कृष्ण बलराम ने मना किया तो कुपित होकर वेग से उन्हीं पर टूट पड़े। तब कृष्ण बलराम भी उन्हीं मोथों से सबको मारने लगे ॥ ३४ ॥

कृष्ण की इच्छा से हाथ में आने पर वे मोथे परिध (लोहा मढ़ी लाठी) हो जाते थे और उनका प्रहार वज्रवत् होता था। चार पांच को छोड़ सब यदुवंशी इस गृहयुद्ध में समाप्त हो गये और कृष्ण भगवान् स्वजन आदि का मोह छोड़ कर, अपने रोते हुये मित्रों, शेष यदुवंशियों और माता-पिता आदि का परित्याग कर अपने धाम चले गये ॥ ३५ ॥

एकलव्य ने अपने अभ्यास से योग्यता प्राप्त की थी क्योंकि द्रोणाचार्य ने उसे सिखाना अस्वीकार कर दिया था फिर भी उसने द्रोण को गुरु मान लिया था। उसकी बुद्धि पवित्र थी और वह द्रोण के सामने सदा नतमस्तक रहता था, किंन्तु द्रोण ने पाप समझते हुये भी अपनी अन्तरात्मा की पुकार के विपरीत केवल अर्जुन की प्रसन्नता के लिये एकलव्य का अंगूठा काट कर उसका जीवन निरर्थक कर दिया पर उसी अर्जुन ने रण में द्रोण पर सबसे अधिक विषाक्त बाण चलाये और पाण्डवों ने उन्हें छल से मार डाला। मरने के बाद भी उन पर लात के प्रहार हुये ॥ ३६ ॥

आप्त पुरुषों में श्रेष्ठ भीष्म पितामह जीवन भर कौरवों पाण्डवों की सहायता करते रहे। वे अपने भतीजों के लिये तीन कन्याओं को बल पूर्वक पकड़ कर ले आये। उन्होंने सती अम्बा और गुरु परशुराम के विरोध की भी चिन्ता नहीं की क्योंकि उन्हें अपने गोत्र का घोर मोह था ॥ ३७ ॥

दुर्योधनं कटुवदं न जहौ सरागो ज्ञात्वापि सांशयिकमात्मनि दुर्मनीषम् ।
सन्तोषणे बहुगुणोऽप्युभयोरशक्तो विद्धोऽर्जुनेन दयितेन विषाक्तबाणैः ॥ ३८ ॥
यस्मै ददुर्नृपतयो बलिमध्वरे प्राक् येनाहृतं बहुधनं च बलान्नृपाणाम् ।
राज्ञामनेकमणिरत्नकिरीटहारी प्राप्तो धनंजयपदं प्रथितः स जिष्णुः ॥ ३९ ॥
गोपैरसद्भिरबलेव विनिर्जितोऽभूत्तैस्तस्य वित्तवनिताश्च हृताः प्रसह्य ।
आसंस्त एव शरचापरथाश्वपार्था व्यर्थं बभूव सकलं स्वकृतेः फलं तत् ॥ ४० ॥
संरक्षणे शिवशिवाच्युतवासवानां द्रौणिः समस्तबलमस्य जघान सुप्तम् ।
संबन्धिनः प्रियसुताः सुहृदो विनष्टा द्वारि स्थितेऽपि शिबिरस्य सशस्त्ररुद्रे ॥ ४१ ॥
पूताशया भगवतोंशभवा महान्तो वैज्ञानिकाः सुकृतिनो बहुपुण्यभाजः ।
यत्रेदृशो न हि बभूवुरघाद्विमुक्तास्तत्रेन्द्रियार्थपरदुष्कृतिनां कथा का ॥ ४२ ॥

दुर्योधन को उनके प्रति सदा सन्देह रहता था। वह उनसे कटु भी बोलता था फिर भी वे अनुराग के कारण उस दुष्टमति को छोड़ नहीं सके। वे महान् गुणवान् हो कर भी दोनों पक्षों को सन्तुष्ट नहीं कर सके और अन्त में परम प्रिय अर्जुन के विषाक्त बाणों से मारे गये ॥ ३८ ॥

अर्जुन ने यज्ञ के लिये अनेक राजों का धन बलपूर्वक छीना था और अनेकों ने भय से बहुत धन दिया था। इसलिये अर्जुन धनंजय कहे जाते थे। उन्होंने अनेक नृपों के मुकुटों और मणिरत्नों का संग्रह किया था, इसलिये जिष्णु (विजयी) के नाम से प्रसिद्ध थे ॥ ३९ ॥

किन्तु उन्हीं अर्जुन को असत् एवं निर्बल गोपों ने अबला नारी की भांति जीत लिया। उन्होंने नारियों के साथ-साथ उनका सारा धन बलपूर्वक छीन लिया, जबकि उनके पास वे सारे पुराने बाण, धनुष, रथ, अश्व आदि विद्यमान थे। वे सब व्यर्थ हो गये, यह कर्मों का ही फल था। उससे भगवान् भी नहीं बचा सके ॥ ४० ॥

शंकर, पार्वती, कृष्ण और इन्द्र सदृश सहायकों के रहते द्रौणि (अश्वत्थामा) ने रात में सोते समय पाण्डवों के अगणित सैनिकों, सम्बन्धियों, द्रौपदी के पांचो पुत्रों और मित्रों को नष्ट कर दिया, जब कि द्वार पर सशस्त्र रुद्र खड़े थे ॥ ४१ ॥

जहां पवित्रात्मा, भगवान् के अंश से उत्पन्न, वैज्ञानिक, अतिकुशल, बहुपुण्यवान् ऐसे महान् पुरुष भी थोड़े पापों के फल से मुक्त नहीं हो सके वहां इन्द्रियों के दास पापी कैसे बचेंगे ॥ ४२ ॥

आच्छादिता उपलकाष्ठचयैरनेकाः कुल्या यथा मलवहा नगरेऽतिरम्ये ।
तद्वत् स्थिता मनसि सन्ति कलेवरे मे विद्वेषलोभभयकोपमनोजमोहाः ॥ ४३ ॥
उत्पादयन्ति नियमे तव देव शंका विस्मारयन्ति दुरितोत्थफलानि चैते ।
मार्गेषु फल्गुषु नयन्ति हठाच्च बुद्धीरुद्वासय द्रुतमिमानत ईश शत्रून् ॥ ४४ ॥
ज्ञातमेतन्मया क्षीयते कर्म नो नाथ भोगं विना जन्मभिर्भूरिभिः ।
दुष्कृतां शर्म कष्टं सतां कर्मणामस्ति पाको निरुक्तं महत्सूरिभिः ॥ ४५ ॥

जैसे अतिरम्य नगर के मार्गों के नीचे पाषाण और काष्ठ से ढकी नालियों में मल बहा करते हैं वैसे ही हमारे शरीरस्थ मन में द्वेष लोभ भय कोप काम मोह आदि दोष स्थित हैं (बुद्धवाक्य) ॥ ४३ ॥ हे देव! ये आप के बनाये नियमों में शंकायें उत्पन्न करते हैं, पाप के भीषण फलों की विस्मृति करा देते हैं और बुद्धिको बलपूर्वक कुमार्ग में ले जाते हैं अतः कृपया इन शत्रुओं को दूर भगा दें ॥ ४४ ॥ हे नाथ! मैंने अब जान लिया है भोगे बिना कर्मों के फल अनेक जन्मों में भी समाप्त नहीं होते। महान् विद्वानों का यह निर्णय सत्य है कि पापियों का आनन्द और सज्जनों का कष्ट पिछले कर्मों का फल है ॥ ४५ ॥